गादाधर्यांपंचलक्षणीप्रारंभः॥

गदा० पं०

१ श्रीगणाधिपतये नमः॥ श्रीरस्तु॥ सर्वमिदं अनुमानप्रामाण्यव्यवस्थापकयुक्तिप्रदर्शनं व्याप्तिनिश्चये सतीत्यन्वयः। स
च व्याप्तिनिश्चय एव न संभवति। नोत्पत्तुमर्हति उपायाभावात् निश्चायकाभावात् अनुमानप्रामाण्योपपादकतया
व्याप्तिग्रहोपायस्यैवेदानीमभिधातुमुचितत्वात् वक्ष्यत इत्यनेन तत्प्रतीक्षां विधाय व्याप्तिस्वरूपनिरूपणमयुक्तमि
त्याशंकां परिजिहीर्षुस्तत्प्राथम्ये तस्य व्याप्तिग्रहोपायप्रतिपादनौपयिकत्वरूपं बीजं दर्शयन्नित्यादिग्रंथमवतार
यति समारब्धेति व्याप्तिग्रहोपायाकथनेन प्रामाण्यव्यवस्थापनस्यानिष्पन्नत्वा समारब्धेति परीक्षाविशेषणं प
रीक्षा परमतनिराकरणपूर्वकस्वमतव्यवस्थापनं कारणीभूतेति प्रतिपादनविशेषणं यद्यपि व्याप्तिग्रहोपायप्रति
पादनस्यानुमानप्रामाण्यव्यवस्थापकत्वकथनं न तस्यावश्यकत्वप्रदर्शनाय व्याप्तिग्रहोपायश्च वक्ष्यत इत्येतद्ग्रंथा
वतारणाद्व्याप्तिग्रहोपायस्यानुमानप्रामाण्योपपादकत्वलाभेनैव तल्लाभात्। तथापि प्रामाण्यव्यवस्थापननिर्वाह १
कतया भवतु व्याप्तिग्रहोपायस्येदानीमाकांक्षितत्वं एवमपि तन्न व्याप्तिस्वरूपनिरूपणं विना संभवतीति प्रथमत
स्तदेवोचितमित्येतत्सूचनाय तदभिहितं। निदानमिति। व्याप्तिघटकीभूताव्यभिचारांशभाने बाधाभावमुद्रया

व्यभिचारज्ञानाभावो हेतुः। साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकांशग्रहे च विशेषणज्ञानमुद्रया सहचारग्रहो हे
तुरिति क्रमेण व्याप्तिग्रहोपायप्रतिपादनस्य व्याप्तिस्वरूपमप्रतिपाद्याशक्यत्वादिति भावः। प्रथमतः पूर्वपक्षस्यैवा
भिधानेन निरूपयतीत्यसंगतमत आरभत इत्युक्तं निरूपणस्य परमतनिराकरणपूर्वकसिद्धान्तकथनरूपत्वात्पू
र्वपक्षाभिधानतत्खंडनयोरपि तदारंभतेति ध्येयं। मूले न तावदव्यभिचरितत्वमिति व्याप्तिरिति प्रश्नस्थमनुषज्यते
तथा चाव्यभिचारपदार्थेनानुमितिजनकज्ञानविषय इत्यर्थः। अनुमितिजनकत्वं नाव्यभिचारपदार्थावच्छिन्नहेतु
विषयताघटितधर्मावच्छिन्नमिति तु पर्यवसितं अत्र हेतुमाह तथाहीति हि यतः साध्याभाववदवृत्तित्वादिरूपं तदव्यभि
चरितत्वं न व्याप्तिरित्यनुषंगेणान्वयः तथा च साध्याभाववदवृत्तित्वादिरूपाये ऽव्यभिचारपदार्थाः पंच तत्तदवच्छि
व न्नहेतुविषयताघटितधर्मावच्छिन्नत्वाभावकूटत्वादिति निरुक्तपर्यवसितसामान्याभावसाधकः फलितो हेतुः न चा
प्रयोजकत्वं विशेषाभावकूटस्य सामान्याभावसाधकतायामविवादात्। तत्र साध्याभाववदवृत्तित्वादिरूपायेपंचा
हेतु व्यभिचारपदार्थाः तत्तदवच्छिन्नविषयताघटितधर्मावच्छिन्नत्वाभावकूटस्य प्रत्येकं साधकं हेतुं वक्ष्यति केवलान्वयि

गदा० पं०

रूपकेवलान्वयित्व

न्यभावादितिसाध्यसंताभावाप्रतियोगि-- त्वान्योन्याभावप्रतियोगितानवच्छेदकत्वग्रहदशायामत्यंतान्योन्याभाव

याः साध्यतद्रूपावच्छिन्नप्रतियोगित्वभानासंभवेन प्रतियोगित्वस्य साध्यतदाश्रयविशेषितासंतान्योन्याभाववदृ

२ त्तित्वावच्छिन्नविषयितायास्तादृशविशेषदर्शिनामनुमितिजनकज्ञानेऽभावादित्यर्थः। एवं च तादृशविषयिताशू

न्यवृत्तित्वमेवानुमितिजनकतायांदर्शितसाध्यसाधको हेतुरभिमत इति नास्तिध्यादिः ईदृशदिशाग्रिमहेतवोपिप

रिष्करणीयाः। दीधितौ अव्याप्यवृत्तीति कपिसंयोग्येतद्वृक्षत्वादिसाध्यादावित्यर्थः। अव्याप्तिमितितत्र हेत्वधिकरणए

तद्वृक्षादावन्यदेशकालावच्छेदेन कपिसंयोगाद्यभावसत्वादितिभावः। साध्यवद्भिन्नायः साध्याभाववानितिकर्मधार

येऽभेदसंबंधेन साध्यवद्भिन्नीयंयत्साध्याभावाधिकरणं तदवृत्तित्वमर्थः स्यात्। तथा सति तद्घटकीभूतस्याभेदसं

बंधेन साध्यवद्भिन्नीयंयत्तदवृत्तित्वस्यैवलक्षणत्वसंभवात्साध्याभावांशस्य वैयर्थ्यापत्तिरतः सप्तमीतत्पुरुषं

व्याचष्टे साध्यवद्भिन्नवृत्तितथा च साध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तद्वदवृत्तित्वमित्यर्थः। तत्र पूर्ववदभेदेन साध्यव

द्भिन्नपदार्थविशेषितधर्मिवृत्तितादेः न घटकता तादृशपदार्थस्य धर्मित्वविशेषणत्वात् इत्यादिविशेषणतयैव सा

ध्यवह्निन्नस्यनिवेशादितिनसाध्याभावाभावांशवैयर्थ्यमितिभावः। अभावेसाध्यीयत्वानिवेशेह्रदादिवृत्तिगगनाद्य
भाववतिपर्वतादौधूमादेःवृत्तेरसंभवइतितद्वारणायसाध्यपदसार्थक्यंनचाधिकरणभेदेनाभावभेदमतएवैत
ल्लक्षणकरणात्पर्वतादेर्नह्रदादिवृत्त्यभाववत्त्वमितिवाच्यं। अव्याप्यवृत्तिप्रतियोगिकाभावस्यव्याप्यवृत्तित्वाव्याप्यवृ
त्तित्वादिरूपविरुद्धधर्माध्यासेनभेदस्यलक्षणकृत्संमतत्वात् आकाशाभावादेर्भेदकाभावेनतस्यैक्यात्। अतएवोक्त
धर्माणांभेदकत्वमेतानिचनभेदकानीत्यनेनदीधितिकृन्निराकरिष्यति अथवासाध्याभावपदंअनुयोगिताविशेष
संबंधेनसाध्यीयपरंअभावीयविलक्षणानुयोगितालाभायवाभावपदंनत्वभावत्वमपिनिवेश्यतेप्रयोजनाभावा
त्। इत्थंचसाध्यवह्निन्नवृत्तिर्यस्तादृशविलक्षणसंबंधेनसाध्यीयस्तद्वद्वृत्तित्वमर्थःतत्रचसाध्यस्ययत्पदार्थाविशेष
णत्वेह्रदादिवृत्तिप्रमेयत्वादिमतिहेतोर्वृत्तेरसंभवःस्यादितितन्निवेशः। अत्रचसाध्याभावःसाध्यतावच्छेदकावच्छिन्न
प्रतियोगिताकोबोध्यःअन्यथावह्निमान्धूमादित्यादौह्रदादिनिष्ठमहानसीयवह्नित्वाद्यवच्छिन्नप्रतियोगिताकव
न्ह्याद्यभावस्यधूमवतिसत्त्वेनपृथिवीत्वाभावद्रव्यत्वाभावान्यतरवान्जलत्वादित्यादौसाध्यवह्निन्नपृथिव्यादिनिष्ठ

गदा० पं० स्यद्रव्यत्वाद्यात्मकस्य साध्यप्रतियोगिकाभावस्य जलादौ सत्त्वेनाव्याप्त्यापत्तेः साध्यतावच्छेदकसंबंधावच्छिन्नत्वेनापि प्रति
योगिता विशेषणीया अन्यथा ह्रदादिवृत्तिसमवायादिसंबंधावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य धूमादिमत्यपि
३ वृत्तेरसंभवस्य कालिकसंबंधेन द्रव्यत्वाभावादौ साध्ये कालत्वादिहेतौ साध्यवद्भिन्नपरमाणुगगनादिवृत्तिदैशिकवि
शेषणतासंबंधावच्छिन्नप्रतियोगिताकसाध्याभावात्मकद्रव्यत्वादेर्हेत्वधिकरणवृत्तित्वेनाव्याप्तेर्वा प्रसंगः अत्र सा
ध्याभाववत्तायां संबंधविशेषावच्छिन्नत्वानिवेशे वह्निमान् धूमादित्यादौ ह्रदादिवृत्तिवह्न्याद्यभावस्य कालिकादिसं
बंधेन पर्वतादौ वृत्तेरव्याप्तिः दैशिकविशेषणताविशेषावच्छिन्नत्वनिवेशे कालिकसंबंधावच्छिन्नप्रतियोगिताकाका
शाभावाभावादौ दैशिकविशेषणतया साध्ये आत्मत्वादिहेतौ साध्यवद्भिन्नकालादिवृत्तेराकाशाभावात्मकसाध्या
पु भावस्यात्मादिवृत्तेर्घटत्वाभावादिसाध्यकस्थले सद्धेतौ साध्याभावस्य घटत्वादेर्दैशिकविशेषणतासंबंधेनाधिक
रणतायां मानाभावेन चाव्याप्तिः अतः साध्यतावच्छेदकसंबंधेन साध्यवत्ताज्ञानं प्रति यादृशसंबंधेन स्वप्रकारकनि
श्चयः प्रतिबंधकस्तेन संबंधेनाभाववत्त्वं निवेश्यं संयोगेन वह्न्यादौ साध्ये तादृशसंबंधो दैशिकविशेषणता कालिक

विशेषणतासंबंधेनाकाशाभावाभावे दैशिकविशेषणतया साध्ये कालिकसंबंधएव तथा समवायादिना घटत्वादेरभा
वे दैशिकविशेषणतया साध्ये समवायादिरेवेति न दोषः॥ नन्वेवं वृक्षनिष्ठाया कपिसंयोगाभावीयमूलावच्छिन्नविशेषण
तातादृशसंबंधेन वृक्षादौ तादृशाभाववत्ताज्ञानेपि कपिसंयोगवत्ताज्ञानोत्पत्तेः तादृशसंबंधो न लक्षणघटक इति सा
ध्यवच्छिन्नवृत्तित्वमभावविशेषणं व्यर्थमिति वाच्यं संयोगतदभावयोरविरुद्धत्वज्ञानाभावदशायां वृक्षः कपिसंयो
गाभाववानिति ज्ञानस्यापि वृक्षे कपिसंयोगवत्ताज्ञानविरोधितया वृक्षनिष्ठतदभावीयविशेषणताया अपि साध्यव
त्ताज्ञानप्रतिबंधकतावच्छेदकीभूतसंसर्गताश्रयत्वात् किंतु साध्यात्मकस्वाभावनिरूपितप्रतियोगितावच्छेदक
संबंधेन साध्याभाववत्त्वं विवक्षितं स च संबंधो यत्संबंधावच्छिन्नप्रतियोगिताकः स्वाभावः साध्यमिति नोक्तानुपप
त्तिः अथ समवायेन प्रमेयत्वावच्छिन्नसाध्यकद्रव्यत्वप्रकारकप्रमाविषयत्वादिहेतुकस्थले कालिकसंबंधस्यापि
तत्संबंधावच्छिन्नप्रतियोगिताकघटाभावरूपप्रमेयनिरूपितप्रतियोगितावच्छेदकत्वात्तेन साध्याभाववति काले
हेतोर्वृत्तेरव्याप्तिः नच साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसंबंधनिवेशान्नायं दोषः कालिकसंबंधावच्छि

गदा०पृं० न च घटाभावादिरूपप्रमेयस्य कालिकसंबंधावच्छिन्नप्रतियोगितायाः घटादावेव सत्वात् कालिकसंबंधस्य समवायसंबं टि०ल०
धावच्छिन्नप्रमेयाभावात्मकस्वनिष्ठप्रतियोगितावच्छेदकसंबंधत्वविरहादिति वाच्यं। तादृशप्रमेयाभावस्य कालिकसं
४ बंधावच्छिन्नप्रतियोगिताको योऽभावस्तस्यापि प्रमेयत्वेन साध्यतया तन्निरूपिततादृशप्रमेयाभावनिष्ठप्रतियोगिता
वच्छेदकत्वस्य कालिकसंबंधेप्युक्ततया व्याप्तेर्दुर्वारत्वात् न च यावत्साध्यनिरूपितप्रतियोगिता निवेशनीया तथा चोपद
र्शिताभावात्मकयत्किंचित्प्रमेयनिरूपितस्वनिष्ठप्रतियोगितावच्छेदककालिकसंबंधमादाय न दोष इति वाच्यं। असम
वेतप्रमेयस्य समवायसंबंधावच्छिन्नप्रमेयाभावोऽत्र नास्तीति प्रमया विषयतया तादृशप्रमेयाभावाभावत्वे मानाभा
वात् तादृशप्रमेयाभावनिष्ठयावत्प्रमेयनिरूपितप्रतियोगित्वाप्रसिद्ध्योक्तस्थले व्याप्तितादवस्थ्यात् न च साध्यताव
च्छेदकसंबंधेन वृत्तिमद्यावत्साध्यनिरूपितप्रतियोगितायां निवेशनीयतया नोक्ताप्रसिद्धिरिति वाच्यं सर्वत्र समवा
प्रतीति यित्वैकयासत्त्यैव तादृशप्रमेयाभावाभाववत्तां निर्वाहे सर्वसमवाय्यसंग्राहकगुणादीनां तादृशप्रमेयाभावाभा
वत्वे मानाभावेन दर्शिताप्रसिद्धेर्दुर्वारत्वादिति न च साध्यतावच्छेदकसंबंधेन वृत्तिमद्यत्किंचित्साध्यनिरूपितस्वनिष्ठ

प्रतियोगितावच्छेदकसंबंधनिवेशेनैवोपपत्तेः कालिकसंबंधावच्छिन्नप्रतियोगिताकस्य दर्शितसाध्याभावाभावस्य सा
ध्यत्वेपि तस्य साध्यतावच्छेदकसमवायसंबंधेनावृत्तित्वात् न चैवमपि कालिकसंबंधेन प्रमेयसाध्यककालत्वादिहेताव
व्याप्तिः कालिकसंबंधावच्छिन्नप्रतियोगिताकप्रमेयाभावस्य यः कालिकसंबंधावच्छिन्नाभावस्तस्य स्वाभावात्मकस्य प्र
मेयत्वेन साध्यस्य प्रतियोगितावच्छेदकीभूतकालिकसंबंधेन कालिकसंबंधावच्छिन्नप्रमेयाभावाधिकरणे हेतौ वृत्तेरि
ति वाच्यं तादृशप्रतियोगितावच्छेदकयत्संबंधेन साध्यवद्भिन्नवृत्तित्वमभावस्य तत्संबंधेन तद्वृत्तित्वस्य विवक्षणीय
त्वादुक्तस्थले च साध्याभावस्य कालिकसंबंधेन साध्यवद्भिन्ने वृत्तेः अथैवं तादृशप्रतियोगितायां स्वनिष्ठत्वनिवेशवि
फलः तदनिवेशे घटभिन्ने घटत्वाभावादिसादौ घटभेदात्मकसाध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसंबंधेन घ
टत्वात्मकसाध्याभाववति घटत्वे हेतोर्वृत्तेरव्याप्तिप्रसक्तावपि तादृशाव्याप्तेरिदृशविवक्षयैव वारणसंभवात् घटत्व
रूपसाध्याभावस्य साध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसंबंधेन साध्यवद्भिन्ने घटे वृत्तेः नन्वेवं तादृशसा
ध्यस्य तादृशसंबंधेन ध्येसावद्भिन्नवृत्तिरभाव एवाप्रसिद्ध इति कथमव्याप्तिविरह इति वाच्यं घटभेदस्य घटत्वाभावस

गदा०पं० मन्नियतत्वेन तद्भिन्नतया घटत्वेपि समवायसंबंधावच्छिन्नायास्तादृशप्रतियोगितायाः सत्वेन तादृशप्रतियोगिताव द्वि०ल०
च्छेदकसमवायेन साध्यवद्भिन्नघटवृत्तिघटत्वरूपसाध्याभावस्य प्रसिद्धिसंभवात् तादृशाभावयोर्भेदे स्वनिष्ठत्वस्य
५ प्रतियोगिताविशेषणत्वेपि घटत्वरूपसाध्याभावनिष्ठसाध्यनिरूपितप्रतियोगित्वाप्रसिध्यात्तद्दोषतादवस्थ्यात् सं
योगिभेदस्य व्याप्यावृत्तित्वरूपवैधर्म्यात् गुणसंयोगाभावाभेदासंभवेपि संयोगवत्प्रकारकप्रमाविषयत्वाभावा
भेदे बाधकाभावात्स्वरूपसंबंधस्यापि साध्यनिरूपितप्रतियोगितावच्छेदकसंबंधतया तेन संबंधेन साध्यवद्भिन्न
वृत्तेः तादृशप्रमाविषयत्वरूपसाध्याभावस्य प्रसिध्या संयोगिभिन्ने गुणत्वादिसाध्याव्याप्तेरनवकाशात् इति चेन्न प्र
तियोगितायां स्वनिष्ठत्वानिवेशे कालिकसंबंधावच्छिन्नाभावो दैशिकविशेषणतासंबंधावच्छिन्नतदभावस्य तादृशसा
ध्यस्वरूपतया दैशिकविशेषणता + काशाभावाभावसाध्ये आत्मत्वादावव्याप्तेर्दुर्वारत्वात् तादृशसाध्यस्यैव + स कालिकसंबंधावच्छिन्ना ३
(बंधावच्छिन्नतदभावस्य तादृशसाध्यस्वरूपतया दैशिकविशेषणता संबंधस्य साध्यनिरूपितप्रतियोगितावच्छे
दकसंबंधत्वात्तेन संबंधेनाकाशाभावरूपसाध्याभावस्य साध्यवद्भिन्ने कालहेतुमति च वृत्तेः प्रतियोगितायां स्व

निष्ठत्वनिवेशे दैशिकविशेषणतया आकाशाभावनिष्ठसाध्यनिरूपितप्रतियोगितावच्छेदकसंबंधत्वविरहेणाव्याप्ते
न रेवकाशात्तन्न साध्यनिरूपितस्वनिष्ठप्रतियोगितानिवेशे साध्याभावपदोपादानवैयर्थ्यं अभावांतरनिष्ठप्रतियो
गितायाः साध्यनिरूपितत्वविरहेणैव तत्व्यावृत्तेरितिवाच्यं। स्वपदार्थस्य द्विधा निवेशेन साध्याभावनिष्ठसाध्यीयप्रतियो
गितावच्छेदकसंबंधेन साध्याभाववत्वनिवेशे प्रोव्यगततत्पदवैयर्थ्यानवकाशात् तादृशसंबंधेन साध्यवद्भिन्नवृत्तिमत्व
मात्रनिवेशे साध्यवद्भिन्नवृत्त्यभावांतरवति हेतावृत्त्यानुपपत्तेरित्याहुः अत्रेदं बोध्यं साध्यवत्वग्रहविरोधिग्रहविषय
संबंधेन साध्यनिरूपितप्रतियोगितावच्छेदकसंबंधेनवानानुमित्यौपयिकव्याप्तिशरीरे भावनिवेशासंभवः साध्यभे
देनव्याप्तेर्भेदाल्लाघवेन तत्तत्साध्यकस्थले तत्तत्साध्याभाववति दैशिककालिकविशेषणतासमवायादिसंसर्गेण
मेव विशिष्याभावसंबंधतया निवेशौचित्यात् उक्तरूपेण विशेषणताविशेषादीनां संबंधतया अत्यंताप्रामाणिक
तयानद्रूपावच्छिन्नस्य संबंधविधया व्याप्तिघटकतायोगाच्च परं तु यादृशसाध्यकस्थले यादृशसंबंधोऽभावसंबंधत
याव्याप्तिघटकः तत्परिचयायैवदर्शितोक्तरूपः तथाच यादृशसंबंधेन प्रकृतसाध्यवति साध्यवद्भिन्नवृत्ति साध्याभावो

नवर्तते तादृशसंबंधेन तद्वत्त्वं निवेश्यमित्यत्रैव तत्तत्परिचयसंभवादित्यलं वाग्जालेन। साध्याभाववत्पदेन साध्याभा
ववविशिष्टादिकरणं विवक्षणीयं तेन गुणान्यत्वविशिष्टसत्ताभाववान् गुणत्वादित्यादौ विशिष्टस्यानतिरिक्ततया सत्ता
रूपसाध्याभावस्य गुणादौ सत्वेपि न क्षतिः गुणे गुणान्यत्वविशिष्टसत्ताभाववो नास्तीति प्रत्ययात्तत्र तादृशाभाववत्वविऽ
शिष्टाधिकरणत्वानभ्युपगमात् अथैतल्लक्षणे घटत्वघटाकाशसंयोगान्यतरत्वावच्छिन्नाभाववान् आकाशत्वादित्यादौ
व्याप्तिः घटत्वस्य व्याप्यवृत्तितया तद्धटितान्यतराभाववच्छिन्ने घटे वर्तमानस्य घटाकाशसंयोगात्मकसाध्याभावस्य हेत्व
धिकरणे गगनेपि वृत्तेः निरवच्छिन्नसाध्याभाववत्तानिवेशे च साध्यवद्भिन्नवृत्तित्ववैयर्थ्यादिति चेन्न एतल्लक्षणक
र्तृमते प्रतियोगिसामानाधिकरण्यस्वप्रतियोगिवैय्यधिकरण्यरूपविरुद्धधर्माध्यासोऽभावस्य भेदक इत्येतादृशा
युक्त्या द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदसिद्धिरित्यनुसरता व्याप्यवृत्तिसाध्यकस्थले व्याप्तिः सऽ
माधीयते तथा च घटाकाशसंयोगस्योक्तान्यतराभावप्रतियोगित्वेपि न तदभावरूपता तथा च सति तादृशविरुद्ध
धर्मयोः समावेशापत्तेस्तयोर्विरोधाभावे संयोगाभावस्याप्यधिकरणभेदेन भेदासिद्धे व्याप्यवृत्तिसाध्यके सर्वत्र

वाच्याप्तिः तदभिप्रायेणलक्षणांतरस्यावतारणीयत्वादितिगगनेतिरिक्तएवतदभावःस्वीकरणीयःसचनसाध्यवद्भि
न्नवृत्तिरितिनदोषः।साध्यवद्भिन्नेवर्ततइत्यनेनानवच्छिन्नायाएववृत्तेर्विवक्षणात्नघटाकाशसंयोगात्मकाभा
वमादायदोषइतितुनश्रद्धेयंतथासतिस्कपुत्यादिकालावच्छेदेनासमदात्मवृत्तौस्वाश्रयाश्रयत्वसंबंधावच्छिन्नप्रति ध्या
योगिताकज्ञानत्वाद्यभावसाध्यकस्वादावव्याप्तिः तन्नसाध्यवद्भिन्नेईश्वरेतादृशसंबंधेननिरवच्छिन्नवृत्तिकस्यऽ
ज्ञानत्वरूपाभावस्यतेनसंबंधेनस्वकाद्यधिकरणेऽसमवायात्मन्यपिवृत्तेः उत्पत्तिकालावच्छिन्नघटादिवृत्तितादृशसं
बंधावच्छिन्नप्रतियोगिताकसत्ताभावादिसाध्यकघटत्वादिहेतावव्याप्तिश्चसंयोगाभावनिष्ठयोर्व्याप्यवृत्तित्वाव्याप्यवृ
त्तित्वयोःप्रतियोगिसमानाधिकरण्यप्रतियोगिवैयधिकरण्ययोर्वक्ष्यमाणरीत्यानविरोधइत्यभिप्रायेणाव्याप्यवृत्ति
साध्यकस्थलेव्याप्त्यालक्षणांतरमवतारयति कर्मत्वादाविति। इदंत्वत्रध्येयंद्रव्यवृत्तिसंयोगाभावोनगुणादौस्वीक्रि
यतेअपितुकृप्ततद्वृत्तिसंयोगत्वप्रकारकप्रमाविषयताद्यभावएवसंयोगाभावत्वंकल्प्यतेअनंतगुणाद्यात्मका
धिकरणेषुसंयोगाभावकल्पनामपेक्ष्यतथाविधेकाभावसंयोगाद्यभावत्वकल्पनेलाघवात्नचसंयोगत्वप्रका

एकप्रमाविषयत्वाद्यभावे द्रव्यत्वाभावे द्रव्यभेदे संयोगिभेदादौ वा संयोगाभावत्वं कल्प्यत इत्यत्र विनिगमकाभाव इति
वाच्यं तादृशाभावानां समनियततयाऽभेदात् एवं च द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदः सप्रमा
णएव अथैवं द्रव्यत्वाभावादीनामप्यानंत्यापत्तिः कर्मादौ गुणवृत्तिद्रव्यत्वाभावो न कल्प्यते। अपितु कॢप्ततद्वृत्तिद्रव्यगु
णान्यतरत्वाभाव एव तदभावत्वमित्यादितर्कगवेषणया कर्मादिवृत्तिद्रव्यत्वाद्यभावस्य गुणादिवृत्तितदभावताभे
दसिद्धिरिति चेत् इष्टमेवैतदधिकरणभेदेनाभावभेदवादिनां न चैवं संयोगाद्यभावत्वकल्पनायां धर्मिणामप्या
नंत्यादुक्तविनिगमकाभावसंभव इति वाच्यं विनिगमनाविरहेणापि द्रव्यत्वाभावादौ संयोगाद्यभावत्वकल्पना
या निष्प्रत्यूहत्वादिति हेत्वोरिति नानाधिकरणकस्येत्यादिः अव्याप्तेरिति एतद्रूपवानेतद्रूपादित्यादावेतद्रूपाधि
करण[illegible]तद्रूपाधिकरणस्य हृत्वादिना भेदसत्वेपि व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन साध्यवन्निष्ठप्रतियोगितायाः
प्रतियोग्यवृत्तित्वेन वा भेदस्य विशेषितत्वेन लक्षणगमनसंभवान्नासंभवो दर्शितः साकल्यमिति बोध्यमित्यस्य
विशेषणमित्यादिः अत्र साध्याभाववति साकल्यविशेषणसत्व एव साध्येतद्विशेषणव्यावृत्तिः संगच्छते अन्यथा

साध्याभाववद्वृत्तायाहेतुमत्साधारण्येपिसाध्याभाववद्यत्किंचिद्व्यक्तिनिष्ठाभावप्रतियोगित्वमादायनानाव्यक्तिसा
ध्यकसध्येतोलक्षणसमन्वयसंभवादतःसाध्येतदभाववतिचेत्यनुक्त्वासाध्याभाववतिसाकल्यविशेषणंप्रथमतो
दर्शितंनचसाध्याभाववतिसाकल्यविशेषणसत्वेपिवन्हिमान्पर्वतान्यत्वादित्यादावतिव्याप्तिवारणमेवसाध्यसा
कल्यविशेषणप्रयोजनमस्ति।उभयत्रसाकल्यविशेषणादानेयत्किंचित्साध्याभाववतिपर्वतेहेत्वभावसत्वेनाति
व्याप्तिःसाध्येसाकल्यविशेषणसत्वेतुहृदादेरेवसकलसाध्याभाववत्तयातत्रहेतुसत्वेनातिव्याप्त्युद्धारान्नोक्ताभिप्रा
यवर्णनंसम्यगितिवाच्यंसाध्याभाववतिसाकल्यविशेषणसत्वे[illegible]साध्येसाकल्यविशेषणस्योक्तातिव्याप्तिवारण
प्रयोजनकत्वसंभवेपिसाकल्यविशेषणस्यवक्ष्यमाणप्रयोजनस्यैववास्तवतयातस्यसाध्याभाववतिसाकल्यवि
शेषणसत्वएवसंगतेरदौतत्रदर्शनस्योचितत्वात्वस्तुतस्तुसाध्यसाकल्यविशेषणंपरित्यज्यसाध्याभावेसाध्यता
वच्छेदकावच्छिन्नप्रतियोगिताकत्वनिवेशरूपकल्पांतरस्यावलंबनीयतयाचरमसेवतत्प्रदर्शनमुचितंसाध्येत
दभाववतिचबोध्यमित्युक्त्वासाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकोवाभावोग्राह्यइत्युक्तौसाध्याभाववतिसा

गदा० पं० कल्पं निवेश्यते साध्याभावो वा एतादृशो निवेश्य इत्येतादृशविकल्पः प्रतीयते सच्चाविवक्षित इतिसां अव्याप्तिवारणा साक०
यसाध्याभावे साकल्यविशेषणे धूमवान्वह्नेरित्यादौ साध्यतावच्छेदकीभूतसंयोगादिसंबंधावच्छिन्नप्रतियोगिताक
८ सकलसाध्याभावाधिकरणं गुणादिरव्यादयो गोलकादेर्ह्रदासंयुक्तत्वावच्छिन्नप्रतियोगिताकाभावानधिकर
णत्वादित्यतिव्याप्तिः वह्निमत्प्रकारकप्रमाविषयो धूमादिसौ साध्यतावच्छेदकीभूतस्वरूपसंबंधावच्छिन्नप्रतियो
गिताकतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावस्य तत्तद्विपक्षमात्रवृत्तितया सकलसाध्याभावाधिकरणाप्रसिद्ध्याव्याप्ति
श्चेति तदुपेक्ष्य साध्यसाकल्यविशेषणं निवेशितं ननु साध्यसाकल्यविशेषणदानेपि वह्निमान् धूमादित्यादावव्या
प्तितादवस्थ्यं पर्वतादावपि पर्वतीयवह्नेर्हृत्वादिनाभावसत्त्वेन सकलसाध्याभावसत्त्वात्। व्यासज्यवृत्तिधर्मानव
च्छिन्नत्वेनाभावविशेषणे च वह्निधूमोभययुक्तान्वह्नेरित्यादावतिव्याप्तिः वह्निमतस्तथाविधसकलसाध्याभावान
धिकरणत्वात् साध्यतावच्छेदकातिरिक्तो यो व्यासज्यवृत्तिधर्मस्तदनवच्छिन्नप्रतियोगिताकत्वनिवेशने चेल्लाघवा गौरवमिति
साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यैवाभावे निवेशनमुचितं किं साध्यसाकल्यविशेषणेनेत्यभिप्रेत्य त

थेवाह साध्यतावच्छेदकेति साध्याभाववति साकल्यविशेषणप्रयोजनमाह। विपक्षेति वैकल्पिकयोः साध्यतदभावयोः
साकल्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्व विशेषणयोर्व्यावृत्तिमाह। नवेति। एकव्यक्तिके एतद्रूपवानेतद्रू
सादिसादौ हेत्वधिकरणपूर्वक्षणावृत्तित्वविशिष्टसाध्याभावो न प्रतियोगितावच्छेदकावच्छिन्न व्यधिकरणः पूर्वक्ष
णादिवृत्तित्वविशिष्टैतद्रूपादेरेतद्रसाधिकरणेवृत्तेरेतद्रूपोभयत्वावच्छिन्नाभावोपि न तथा प्रतियोगितावच्छेदकाव एतद्रू
च्छिन्नाधिकरणप्रसिद्धेरतस्तल्लक्षणसंगतेर्नानाव्यक्तिकेऽसत्वं अत एवाव्याप्तिर्वोक्तानासंभवः अत एव नानाव्य
क्तिसाध्यकत्वंव्यधिकरणद्वयवृत्तिसाध्यतावच्छेदककत्वं अत एवातद्व्यक्तिवृत्तियावद्धर्मवानेतत्वादिसादौ नानाव्य
क्तिसाध्यकेऽव्याप्तिविरहेपि न क्षतिः अव्याप्यवृत्तीतिकपिसंयोग्येतद्वृक्षत्वादिसादाविसर्थः अव्याप्तेर्वारणायेतल्ल
नेनान्वयः अभिचारिणिचेति पृथिवीकपिसंयोगादिसादौ चेसर्थः। अभाववृत्त्यसाध्याभावे हेत्वभाववत तथा चा
व्याप्यवृत्तिसाधकव्याप्यवृत्तिसद्धेतौ अव्याप्तिवारणाय साध्याभाववद्व्यभिचारिणि चाव्याप्यवृत्तावपि व्याप्तेर्वार
णाय हेत्वभावप्रतियोगिवैयधिकरण्यमित्यर्थः। यद्यपि हेत्वभावप्रतियोगिवैयधिकरण्य विशेषणस्यावश्यकत

गदा० पं०

९

याकपिसंयोगीकपिविभागादित्यादौ चाव्याप्यवृत्तिहेतुके व्याप्तिवारणप्रयोजनकत्वं साध्याभावेन तद्विशेषणस्य संभ साक०
वतीति व्याप्यवृत्तीत्यसकिंचित्करं तथापि हेत्वभावेन तद्विशेषणप्रतिसंधानं विनैव व्याप्यवृत्तिहेतुकस्थले व्याप्तिनिर्ण
यो भवतीत्येतदभिसंधायैव तदुक्तं प्रतियोगिवैयधिकरण्यं च न प्रतियोग्यधिकरणावृत्तित्वं अव्याप्यवृत्तिसाध्य
कतथाविधहेतुके च तादृशसाध्याभावहेत्वभावाप्रसिद्ध्या अव्याप्तेः अपितु प्रतियोग्यनधिकरणवृत्तित्वं तथा
च प्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभावाधिकरणेषु यावत्सु प्रतियोग्यनधिकरणवृत्तित्वविशिष्टः स
न्न वर्त्तते योऽभावस्तत्प्रतियोगित्वमर्थः तेन कपिसंयोग्येतत्त्वादित्यादौ कपिसंयोगाद्यनधिकरणगुणादिवृत्ति
त्वोपलक्षितकपिसंयोगाद्यभावस्य हेत्वधिकरणसत्त्वेपि नाव्याप्तिः न वा एतद्वृक्षत्ववान् कपिसंयोगादित्यादौ तथावि
धकपिसंयोगाभावस्य सकलसाध्याभावाधिकरणसत्त्वेप्यतिव्याप्तिः प्रतियोग्यनधिकरणीभूतसाध्याभावाधि
करणयावन्निष्ठस्वप्रतियोग्यनधिकरणताकाभावप्रतियोगित्वमिति फलितार्थः प्रथमे साध्यतावच्छेदकसंबंधेन
चरमे हेतुतावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वं बोध्यं तेनायमात्मा आत्ममहाकालान्यतरत्वादित्यादौ व्यभिचा

रनिरूपकाधिकरणस्यकालस्यकालिकसंबंधेनास्मत्वाधिकरणत्वेपिनातिव्याप्तिः नवावह्निमान्धूमादित्यादौसाध्या
भावाधिकरणयावदंतर्गतकालज्ञानादिषुकालिकविषयितादिसंबंधेनहेत्वभावप्रतियोग्यधिकरणतासत्वेप्यसं
भवोव्याप्तिर्वाइत्थंचप्रतियोगित्वसंबंधविशेषावच्छिन्नत्वेननिवेशनीयसंबंधांतरावच्छिन्नप्रतियोगिताकयोः साध्या
ग भावहेत्वभावयोरुक्तसंबंधेनप्रतियोगिसमानाधिकरणत्वासंभवातिव्याप्त्योरनवकाशात्हेत्वभावेपीति अपिश
ब्देनसाध्याभावेपिप्रतियोगिता[illegible]वच्छेदकावच्छिन्नत्वेव्यधिकरण्यंनिवेशनीयमितिसूच्यतेतेन
विशिष्टसत्तावान्जातेरित्यादौहेत्वधिकरणगुणादिषुसाध्याभावप्रतियोगिसत्तादेः सत्वेपिनातिव्याप्तिः अत्रसा
ध्याभावेपीत्युक्तौअप्रि मत्सरेनहेत्वभावपरामर्शासंभवः तत्रहेत्वभावपदोपादानेक्षराधिक्यमितित्वोक्तं
नत्प्रतियोगित्वंसाध्याभाववन्निष्ठाभावप्रतियोगित्वंहेतुतावच्छेदकरूपेणहेतुतावच्छेदकावच्छिन्नमित्यर्थः हेत्वभा
वनिष्ठप्रतियोगिव्यधिकरण्यशरीरेस्वप्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशस्यप्रयोजनमाह द्रव्यत्वादाविति
विशिष्टेतिगुणकर्मान्यत्वविशिष्टेत्यर्थः।प्रतियोगितायांहेतुतावच्छेदकावच्छिन्नत्वनिवेशस्यप्रयोजनमाहनवेतिअ

गदा० पं० त्रापि द्रव्यत्वादौ साध्ये इत्यनुषज्यते विशिष्टसत्तात्वादिना गुणकर्मान्यत्वविशिष्टसत्तात्वादिना। तृतीयार्थश्चाव सा० क०
१० च्छिन्नप्रतियोगिताकत्वं तस्याभावेऽन्वयः। प्रतियोगिपदार्थैकदेशप्रतियोगितान्वितमवच्छिन्नत्वं वा तदर्थः। तादृशाभा
वेति। सकलसाध्याभाववन्निष्ठाभावेत्यर्थः। न च हेत्वभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यस्थले हेतुता
वच्छेदकावच्छिन्नवैयधिकरण्यमेव निवेश्यतां ततोऽपि तत्प्रयोजननिर्वाहात् तथा च द्रव्यं सत्त्वादित्यादौ गुणादिनि
ष्ठविशिष्टसत्ताभावस्य हेतुतावच्छेदकावच्छिन्नसमानाधिकरणत्वेवातिव्याप्तिवारणसंभवात्। प्रतियोगिता
यां हेतुतावच्छेदकावच्छिन्नत्वनिवेशनमफलमिति वाच्यं हेत्वभावे हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे स
कलसाध्याभाववन्निष्ठाया हेतुतावच्छेदकावच्छिन्नानधिकरणवृत्तित्वविशिष्टनिरूपिताधिकरणतात्वनिरूपका
भावप्रतियोगित्वमर्थः स्यात् तदपेक्षया सकलसाध्याभाववन्निष्ठहेतुतावच्छेदकावच्छिन्नाभावादृशप्रतियोगिता
वच्छेदकावच्छिन्नानधिकरणतात्वरूपास्मदीयफलितार्थस्य गुरुत्वात् न च ममापि सकलसाध्याभाववन्निष्ठ
यद्धर्मावच्छिन्नानधिकरणत्वं तद्धर्मवत्त्वमित्येवार्थः। स चातिलघुरेवेति वाच्यं तादृशार्थकरणे मूलोक्तप्रतियोगि

ताव्याप्तिंआहन्येतेतिमूलानुसारेणदीधितिकृतागुर्वर्थानुसरणगतउक्तविशेष्यविशेषणभावेननिवेशेऽर्थविशेषणा
तानवकाशगतएतल्लक्षणंदूषयित्वोक्तरलक्षणमवतारयतियत्रैकव्यक्तिकमिति।यत्रैकव्यक्तिकंसाध्यंतत्राव्याप्तिरित्य
न्वयःएतद्रूपवानेतद्रूसादित्यादावनेकाशेषत्वरूपसाकल्यस्यसाध्येसत्वादितिभावः।साध्येसाकल्यविशेषणंपरित्य
ज्यकल्पतरैनुसरणान्नतत्रैतद्दोषावकाशइत्यतआह।विपक्षेतिविपक्षः साध्याभाववान् अत्रापिएकव्यक्तिकमित्य वे
स्यविपरिणतस्यानुषंगः।तथाचैतद्घटभिन्नंपटत्वादित्यादौसाध्याभावेएतद्घटादौसाकल्याप्रसिद्ध्याव्याप्तिरित्य
र्थः।सकलपदस्याशेषमात्रपरत्वेदोषांतरमाह।निर्धूमत्वव्याप्येइतितत्वेननिर्धूमत्वव्याप्यत्वेनतथाचधूमत्वावच्छि
न्नाभावव्याप्यवान्वह्नित्वावच्छिन्नाभावादित्यादावित्यर्थः।धूमत्वाद्यवच्छिन्नाभावेसाध्येएकव्यक्तिकतयापूर्वदोषाक्रां
तत्वेनतद्व्याप्यसाध्यकानुसरणंनिर्धूमत्वव्याप्यजलत्वादेस्तद्रूपेणसाध्यतायांसद्धेतुतानुपपत्तिरतस्तत्वेनेत्यु
क्तं।हेतुभावस्येति।अथवह्न्यात्मकहेत्वभावस्यप्रत्येकंसकलसाध्याभाववन्निष्ठत्वासंभवेपिसकलतन्निष्ठवह्न्यभावा
दिभेदप्रतियोगितामादायैवलक्षणंसंगमनीयंहेतुतावच्छेदकसंबंधेनप्रतियोगिवैयधिकरण्यनिवेशादव्यभि

गदा०पं० चारिणि संबंधांतरावच्छिन्नप्रतियोगिताकहेत्वभाववमादायातिप्रसंगानवकाशेन हेत्वभावप्रतियोगितायां हेतुतावच्छेदक साक०
संबंधावच्छिन्नत्वनिवेशनात् यत्तु वन्हिमद्ध्रदेहेतुताभिप्रायकोयंग्रंथः तत्र हेतुभेदमादायापि लक्षणगमनासंभवात् भेद ग
११ भेदस्यानवस्थाभयेनाधिकरणस्वरूपस्य स्वीकरणीयतया तस्य च प्रत्येकविश्रांततया यावद्विपक्षवृत्तित्वासंभवादिति
भेद तन्न आकाशाभावाद्यधिकरणकभेदस्याकाशाभावादिस्वरूपतया तस्य च यावद्विपक्षवृत्तित्वेन तमादायैव लक्षणगम
नसंभवात्। न चैवं रीत्याकाशाभावमादाय भेदहेतुकव्यभिचारिण्यतिप्रसक्त्या हेत्वभावत्वेन सकलसाध्याभावा
धिकरणवृत्तित्वं विवक्षणीयं तथा सत्यधिकरणस्वरूपाभावस्य स्वस्मिन्नेव तदभाववत्त्वेन वृत्तिरिति नातिव्याप्त्यवकाशः
एवं चाकाशाभावमादाय नोक्ताव्याप्तिपरिहार इति वाच्यं उक्तस्थल आकाशाभावस्य हेतुतावच्छेदकसंबंधेन प्रतियोगिवै
यधिकरण्यविरहादेवातिव्याप्तिवारणसंभवेन तादृशविवक्षाया निष्प्रयोजन[illegible]कत्वात् वन्हिमद्ध्रदहेतुकस्थले च
साध्याभावाधिकरणस्य हेतुरूपप्रतियोग्यनधिकरणत्वेनाकाशाभावरूपहेतुभेदस्य प्रतियोगिव्यधिकरणत्वेनाव्या
प्तिवारणसंभवादिति अत्र केचित् यत्र वन्ह्यभावान्यत्वविशिष्टनिर्धूमत्वव्याप्यं साध्यं वन्ह्यभावान्यत्वविशिष्टवन्ह्यभा

वोहेतु तत्रवन्ह्यभावस्यापिसकलसाध्याभाववदंतर्गततयातत्रवन्ह्यभावभेदासत्वेनतन्मदायलक्षणगमनासंभवात्
नन्वेतादृशविशिष्टहेतुकस्थलेहेतुभेदस्यसकलसाध्याभाववन्निष्ठत्वासंभवेपिअखंडविशिष्टासंताभावस्यतथात्वमा स्य
दायैवलक्षणंसंगमनीयमितिवाच्यंप्राचीनमतेविशेषणाभावविशेष्याभावाभ्यामनतिरिक्ततयातादृशविशिष्टा
भावस्यवन्ह्यभावत्ववन्ह्यभयनूपतेनसकल+विशिष्टाभावस्य+साध्याभाववन्निष्ठत्वासंभवात् अथैवमपिविषयिता
दिसंबंधावच्छिन्नप्रतियोगिताकस्यवन्ह्यभावासंताभावस्याखंडतयासकलधूमवन्निष्ठतयातमादायैवलक्षणंसं
गमनीयमितिचेन्नवृत्त्यनियामकतयाविषयितादिसंबंधानाम्संताभावप्रतियोगितानवच्छेदकत्वात्। संयोगादि
पव्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकवन्ह्यभावासंताभावस्याखंडस्यसकलधूमवन्निष्ठत्वेपितदभावप्रतियो
गितानहेतुतावच्छेदकीभूतवन्ह्यभावत्वावच्छिन्नात्तत्रलाघवेनाभावत्वस्यैवावच्छेदकत्वादितिनतमादायापिलक्षणसंग पि
तिः नन्वगुरुधर्मावच्छिन्नहेतुकस्थलेलक्षणसंगमनायपारिभाषिकमेवावच्छेदकत्वंहेतुतावच्छेदकेनिवेश्यंतथाचव
न्ह्यभावतादेरपितादृशावच्छेदकत्वमस्त्येवेतिवाच्यंएतल्लक्षणस्यपरिसाज्यतयानिखिलदोषोद्धारानावश्यकत्वे

नपारिभाषिकावच्छेदकत्वं न निविष्टमित्यभिप्रायेण तद्दोषवारणादिति वदंति तदसत् तथा सत्यपि सकलसाध्याभाववन्निष्ठका

लिकसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावाद्यभावमादाय लक्षणसमन्वयसंभवात् न च जन्यमात्रस्य कालोपाधिताम
तेसाध्याभाववति पर्वतादौ कालिकसंबंधेन वह्न्यभावादिसत्त्वात्तत्र तत्संबंधेन तस्याभावो न वर्त्तत एवेति वाच्यं कालिकसं
बंधेन तत्र वह्न्यभावसत्त्वेपि प्रतियोग्यनधिकरणीभूतवह्निमद्देशावच्छेदेन तत्र तत्संबंधावच्छिन्नप्रतियोगिताकतद
भावस्यापि सत्त्वात् एतेन विशेषणताविशेषसंबंधेन वृत्तिघटितसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकधू
माभावव्याप्यवान् तादृशसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावादिरित्येतत्परं तत्र धूमसामाना
धिकरण्यरूपस्य सकलसाध्याभावस्याधिकरणं हेतुरपि तस्य धूमाधिकरणेसत्त्वात्। तत्र च हेतुभेदमादायापि न ल
क्षणसमन्वयसंभवः अयंताभावमादाय तदसंभवो दर्शितरीत्यावसेयः। इत्थं च विशिष्टाभावस्य विशेष्याभाववि
शेषणाभावाभ्यामतिरिक्तत्वेपि न दोषासंगतिरित्यपास्तं। तत्रापि कालिकसंबंधावच्छिन्नाभावमादाय दोषवारण
संभवात्। तस्मात्प्रतियोगितावच्छेदकसंबंधेनैव प्रतियोगिवैय्यधिकरण्यं निविष्टं प्रतियोगिता च हेतुतावच्छेदकसं

बंधावच्छिन्नत्वेन निविष्टे समभिप्रायेण तद्दोषदानं हेतुतावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यप्रवेशे तु अग्रिमल
क्षणापेक्षया गौरवमेव लक्षणान्तरे बीजं बोध्यं। एतेन सकलशब्दस्य व्यापकतार्थकतया साध्याभावव्यापकीभू
ताभावप्रतियोगित्वमेव निष्कृष्टे तल्लक्षणार्थः धूमवान्वह्नेरित्यादौ प्रमेयत्वादिना वह्न्यभावस्य साध्याभावव्यापक
त्वेपि न क्षतिः यद्रूपावच्छिन्नप्रतियोगिताकाभावत्वं साध्याभावव्यापकतावच्छेदकं तद्रूपवत्त्वस्यैव लक्षणत्वात्। एवं च
हेत्वभावे प्रतियोगिवैयधिकरण्यं न निवेश्यते व्यापकतालक्षणप्रतियोगिवैयधिकरण्यानिवेशेनाव्याप्यवृत्तिहे
तुकव्यभिचारिणि हेत्वभावस्य साध्याभाववन्निष्ठहेतुरूपाभावप्रतियोगितया व्यापकतासंभवेनातिप्रसंगविरह
त् व्यापकताशरीरे च हेतुतावच्छेदकसंबंधेन साध्याभाववन्निष्ठत्वमभावे निवेश्यते तेन वह्न्यभाववति कालिकादि
संबंधेन धूमादिरूपाभावस्य वृत्तावपि धूमाभावादेर्न साध्याभावव्यापकताक्षतिः। सत्तावज्जातेरित्यादौ साध्याभा
ववति हेतुतावच्छेदकसंबंधेन वृत्तेरप्रसिध्याव्याप्तिर्लक्षणपंचक एव दोषः। अस्तु वा हेतुतावच्छेदकसंबंधेन हेतुमत्ता
ज्ञानं प्रतियादृशसंबंधेन हेत्वभाववत्ताग्रहः प्रतिबंधकस्तादृशसंबंधेन स्वावच्छिन्नाधिकरणभिन्नसाध्याभावाधि

करणकंयच्चस्वंतद्भिन्नत्वमेवसाध्याभावव्यापकतावच्छेदकत्वंइत्थंचसत्तावान्जातेरित्यादौतादृशंस्वंजातित्वाभावत्वादिक साक०
गदा०पं० मेवतद्भिन्नंचजात्यभावत्वादिकमितिलक्षणसमन्वयःइत्थंचैतद्वृक्षत्ववान्कपिसंयोगादित्यादौकपिसंयोगाभाववत्त्वावच्छि
१३ न्नानधिकरणत्वाप्रसिद्ध्याकपिसंयोगाभावत्वंनैतादृशंस्वमितिकपिसंयोगाभावत्वस्यसाध्याभावव्यापकतावच्छेदक
त्वात्।अतिव्याप्तिवारणायहेत्वभावप्रतियोगिवैयधिकरण्यविशेषणंदेयमेवनदेयमेववाअधिकरणत्वाभावस्यैवा
धिकरणभिन्नत्वस्थानेनिवेशनीयत्वात्कपिसंयोगाभावादेरिवतदधिकरणतायाअव्याप्यवृत्तितयातदभावस्यसा
ध्याभाववतिसत्त्वेनातिव्याप्त्यनवकाशात्अधिकरणत्वाभावस्याभावप्रतियोगिकतयाऽतिरिक्तत्वेतिविशेषणतावि दि
राम शेषेणवातद्वत्त्वंसाध्याभाववतिविशेषणीयमितिएवंचनिर्धूमत्वव्याप्यवान्निर्वह्नित्वादित्यादौहेत्वभावस्यवह्न्यादेः
प्रत्येकंयावद्धिपक्षावृत्तित्वेपिहेत्वभावत्वेनतेषांसाध्याभावव्यापकत्वान्नाव्याप्तिरितिपूर्वपक्षाशयःकिंचित्करःयत्तया
वतांसाध्याभाववतांसंभवस्तत्रप्रातिस्विकरूपेणतदधिकरणवृत्तित्वमेवहेत्वभावविशेषणतयालक्षणघटकंन
तुसाध्याभावव्यापकत्वमित्यभिप्रायेणैवैतद्दोषदानात्प्रकारान्तरानुसारेणपरिष्कारेसकललक्षणानामेवपरिष्का

रसंभवादितिकृतं पल्लवितेन साध्यवद्व्यक्तिविशेषभेदमादायाव्याप्तिं परिहरति। अन्येति। साध्यवत्त्वावच्छिन्नप्रतियोगि
ताकत्वमिति साध्यतावच्छेदकविशिष्टसाध्यवत्त्वपर्याप्तप्रतियोगितावच्छेदकताकत्वमित्यर्थः। तेन वन्हिमान् धूमादित्या
दौ तत्तद्वन्हिमत्त्वावच्छिन्नप्रतियोगिताकभेदमादाय न दोषः तादृशभेदप्रतियोगितावच्छेदकतायास्तत्त्वविशिष्टत्वाव
पर्याप्तत्वात्। व्युत्पत्तिबललभ्यं अन्यादिपदसमभिव्याहारलभ्यं नञादिपदसमभिव्याहारज्ञानस्यैव तादृशपदसम
भिव्याहारज्ञानस्याप्यन्वयितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावशाब्दत्वावच्छिन्नं प्रसेकजनकत्वादिति भावः।
व्युत्पत्तिबललभ्यमित्यनेन यथाश्रुतलक्षणवाक्यार्थ एवायमिति सूचितं तादृशसमभिव्याहारस्थले तत्प्रतियोगिका
भावमात्रबोधे इति प्रसंगं सूचयति न हि भवतीति प्रामाणिकव्यवहार इति शेषः तथा चान्वयिप्रतियोगिकाभावमात्र
बोधे नीलघटेपि पीतघटादिभेदसत्त्वेन तादृशव्यवहारोपि स्यादिति भावः। द्रव्यं न घट इत्याद्यप्रयोगादनुयोगितावच्छे
दकावच्छेदेनैवान्योन्याभावादिरन्यादिपदेन प्रत्याय्यते अनुयोगितावच्छेदकश्च प्रतियोग्यवृत्तिरेव धर्म इति प्रकाश
कृदङ्गीकृतव्युत्पत्त्यनुरोधात् घटो घटान्य इति प्रयोगवारणसंभवान्नील इति घटादन्य इत्यादौ प्राचीनमते पंचम्याः।

गदा॰ पं॰ १४

पंच॰

प्रतियोगित्वमर्थः। तत्र च प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य घटत्वाद्यवच्छिन्नत्वविशिष्टाधेयतासंबंधेनान्वयः। अथवा केवलाधे
यत्वमेव घटस्य संबंधः धर्मिपारतंत्र्येण घटत्वादेरपि अवच्छिन्नत्वसंबंधेन तत्रान्वयोपगमात् एकविशेषणत्वेनोपस्थि
तस्याप्यन्यत्र पारतंत्र्येणान्वयस्य व्युत्पत्तिसिद्धत्वात् प्रतियोगित्वस्य व्युत्पत्तिवैचित्र्येणान्यपदार्थैकदेशे भेदे निरूप
कतासंबंधेनान्वयः। घटान्य इत्यादौ च निरूपकतासंबंधेन घटत्वावच्छिन्नप्रतियोगिताविशिष्टो लक्षणया घटादिपदा
र्थस्तत्पुरुषस्थले पूर्वपदस्य तत्तद्विभक्त्यर्थविशिष्टे लाक्षणिकत्वात्तादृशघटादिपदार्थस्य चाभेदसंबंधेन भेदेऽन्वयः।
नवीनमते घटादन्य इत्यादावनुयोगित्वं पंचम्यर्थः तत्र च प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य स्ववृत्तिघटत्वाद्यवच्छिन्न
निरूपकतासंबंधेनान्वयः अनुयोगितायाश्चाश्रयत्वसंबंधेन भेदेऽन्वयः समासस्थले च घटत्वाद्यवच्छिन्ननिरू
पितानुयोगिताविशिष्टे पूर्वपदस्य लक्षणा तस्य चाभेदसंबंधेन भेदेऽन्वयः। अथैवं साध्यवदन्यावृत्तित्वमित्यत्र ता
दृशलक्षणवाक्यात् अभेदसंबंधेन तादृशप्रतियोगिताविशिष्टविशेषितस्तादृशानुयोगिताविशिष्टविशेषितो वा
यो भेदस्तद्वदवृत्तित्वमेव प्रतीयते तथा चानुमित्यौपयिकव्याप्तिस्वरूपजिज्ञासायां तादृशलक्षणाभिधानेऽर्थांत

रप्रसंगः। तादृशप्रतियोगितासंबंधेन तादृशानुयोगितासंबंधेन वा साध्यवद्विशेषितभेदवदवृत्तित्वज्ञानस्यैव ला
घवेनानुमितिहेतुत्वादिति चेन्न यादृशव्याप्तेर्ज्ञानमनुमितिहेतुः तस्यामेवास्य तात्पर्यात् तस्याः शाब्दबोधाविषयत्व
पि तन्मूलकोदीच्यतादृशव्याप्तिविषयकमानसोपनीतभानस्यैव तादृशतात्पर्यनिर्वाहकत्वात् तादृशशाब्दबोध
स्यापि कथंचिदुपपादयितुं शक्यत्वाच्च नीलो घटः कंबुग्रीवादिमदन्य इत्यादिवाक्यस्याप्रमाणत्वात् पटः कंबुग्रीवा
दिमदन्य इत्यादिवाक्यस्य प्रमाणत्वात् अन्वयितावच्छेदकनिरूपितं पारिभाषिकमवच्छिन्नत्वं प्रतियोगितायां भास
तद्रूपेयं अतः साध्यवदन्य इत्यादौ मतुबंतप्रतिपाद्यतावच्छेदकस्य साध्यसंबंधस्य साध्यापेक्षया गुरुतया न त
च्छेदकत्वेपि नोक्तलक्षणवाक्यार्थाप्रसिद्धिः पारिभाषिकं तदवच्छिन्नत्वं च तद्विशिष्टसंबंधिनिष्ठाभावीया या या
प्रतियोगिता तदवच्छेदकताभावकूटवदवच्छिन्नत्वं एतादृशावच्छिन्नत्वस्य संबंधतया निवेशनीयत्वात् प्रातिस्वि
करूपेण तत्तत्प्रतियोगिताव्यक्तीनां दुर्ज्ञेयत्वेपि न क्षतिः संबंधज्ञानस्य विशिष्टबुद्धावनपेक्षितत्वात् अनुमितिं प्र
ति च साध्याभाववच्छिन्नप्रतियोगितावगाहिज्ञानमेव कारणं लाघवात् न तु साध्यसंबंधावच्छिन्नप्रतियोगिताव

गाहिज्ञानमित्यनुमित्सोपयिकव्याप्तिशरीरेतादृश्येवप्रतियो।गितानिवेश्यतेकंबुग्रीवादिमत्वान्घटादित्यादौविशे सिद्धं०
गदा०पं० षदर्शिनामनुमितेप्रामाणिकत्वेनिरुक्तपारिभाषिकावच्छिन्नत्वमेवानुमित्सोपयिकव्याप्तिघटकंतादृशगुरुधर्मा
१५ वच्छिन्नसाध्यकानुमानस्यकेवलान्वयिसाध्यकसमभिशीलतावादिनस्तुस्वरूपसंबंधरूपमेवावच्छिन्नत्वंव्याप्ति
शरीरेनिवेशयंतीतिसमासः।साध्यसामानाधिकरण्यानधिकरणत्वमित्यत्रलक्षणेयद्वित्तदधिकरणवृत्ति
तद्रूपमसामानाधिकरण्यंनिवेश्यतेनतदाद्रव्यंसत्वादित्यादावतिव्याप्तिःसत्तायांद्रव्यत्वाधिकरणवृत्तितयाता
दृशसामानाधिकरण्यानधिकरणत्वात्तदनधिकरणवृत्तितस्यासामानाधिकरण्यपदार्थत्वेनंतरवक्ष्यमाण
लक्षणभेदइत्यतोव्याचष्टे।साध्यमितिअसमानाधिकरणंयस्येत्यत्रसमानाधिकरणपदस्यत्वानधिकरणाधि
करणार्थकत्वेद्रव्यंसत्वादित्यादौ[illegible]वातिव्याप्तिःद्रव्यत्वादेःसत्ताद्य
नधिकरणाधिकरणकत्वविरहेणयत्पदेनसत्वादेरूपादानासंभवात्।सत्तावान्द्रव्यत्वादित्यादावव्याप्तिश्चसत्ता
देर्द्रव्यत्वाद्यनधिकरणाधिकरणत्वादतस्तदधिकरणानधिकरणत्वपरतयातत्पदंव्याचष्टे।यदधिकरणेतिपद

ल

धिकरणानधिकरणकंसाध्यंतत्तानधिकरणँस्यव्याप्तित्वेव्याप्येविशिष्टैकार्थनिरूपतानुपपत्याविशिष्टपरामर्शस्यानु
मितिहेतुत्वानिर्वाहः यत्वतत्वाननुगमेनतत्ताधिकरणत्वाभावकूटस्यनिवेशनीयतयागौरवंचेत्साश्रयेनयत्वत
त्वघटितसाध्यसामानाधिकरण्यपदार्थमाह।साध्यनिष्ठेति।साध्यनिष्ठंयदसामानाधिकरण्यंस्वाधिकरणीभूतय
त्किंचिद्व्यक्तिवृत्तित्वाभावःतत्प्रतियोगित्वंतत्प्रतियोगिकोटिप्रविष्टाधिकरणकत्वंसाध्यनिष्ठाभावीयाधेयत्वनिष्ठप्र
तियोगितायांनिरूपितत्वसंबंधेनयदवच्छेदकंतद्वृत्तित्वमितियावत्।वह्निमान्धूमादित्यादौसाध्यनिष्ठाभावोहृ
दाधेयत्वाभावस्तदीयप्रतियोगितायामुक्तसंबंधेनावच्छेदकोहृदादिस्तद्वृत्तित्वानधिकरणत्वंधूमादावितिलक्ष
णसमन्वयः।अत्रसाध्यनिष्ठाभावप्रतियोग्याधेयत्वंसाध्यतावच्छेदकसंबंधावच्छिन्नंग्राह्यं अन्यथावह्निमान्धू
मादित्यादौपर्वतादिसमवेतत्वाद्यभावमादायानुपपत्तेः।तथाचसत्तावान्समवायित्वादित्यादौसाध्यनिष्ठाभा
वीयसमवेतत्वनिष्ठप्रतियोगितावच्छेदकाधिकरणप्रसिद्धेरव्याप्तिःवह्निमान्धूमादित्यादावपिधूमादेरयोगो
लकीयवह्न्यादिनिष्ठपर्वतादिवृत्तित्वाभावप्रतियोगितावच्छेदकपर्वतादिवृत्तित्वादव्याप्तिश्चसाध्यतावच्छेदक

गदा० पं०

१६

व्यापकीभूताभावनिवेशेचगौरवमित्याशयेनफलितार्थमाह। साध्यनिष्ठाधेयत्वेति अनिरूपकत्वमिहसाध्यनिष्ठाधेय सिंह०
त्वावच्छेदेनग्राह्यंतेनवन्हिमान्धूमादित्यादौमहानसादेःपर्वतीयवन्हिनिष्ठाधेयत्वानिरूपकत्वेपिनाव्याप्तिःएवं
साध्यतावच्छेदकसंबंधावच्छिन्नत्वेनाधेयतानिवेशनीयातेनायमात्मामहाकालान्यतरत्वादित्यादौकालस्यकालि
कसंबंधावच्छिन्नात्मत्वादिनिष्ठाधेयतानिरूपकत्वेपिनातिव्याप्तिःतादृश्याधेयतानिरूपकेयत्राधिकरणत्वमवि
वक्षितंतदनिरूपकत्वमात्रंनिविष्टंप्रथमतोद्रव्यंसत्वादित्यादावतिव्याप्तेरशंकितत्वयाव्यभिचारिसामान्यएवाति
व्याप्तिमुध्धरति। साध्यवद्भिन्नस्येतिव्यभिचारनिरूपकाधिकरणस्यचेत्यर्थः। अत्राधिकरणवृत्तित्वंहेतुतावच्छेदक
संबंधेनग्राह्यंअन्यथावन्हिमान्धूमादित्यादौवन्हिनिष्ठाधेयत्वानिरूपकस्वावयवादौधूमादेःसमवायेनवृत्ते
रव्याप्त्यापत्तेःइत्थंचसत्तावान्द्रव्यत्वादित्यादावव्याप्तिःसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणेसामान्यादौहेतुता
वच्छेदकसंबंधात्मकसमवायादिसंबंधेनवृत्तेरप्रसिद्धेःएवंद्रव्यंविशिष्टसत्वादित्यादावपिविशिष्टसत्वादेःसत्ता
दनतिरिक्ततयासाध्यनिष्ठाधेयत्वानिरूपकाधिकरणगुणादिवृत्तित्वानधिकरणत्वासंभवादव्याप्तिरित्यतआनि

त्वंनतुतद्वृत्त्यत्यंताभावप्रतियोगितानवच्छेदक ४

स्फुटार्थमाह। साध्यनिष्ठेति। अत्रापिपूर्वदोषवारणायसाध्यतावच्छेदकसंबंधावच्छिन्नत्वेनाधेयत्वंनिवेशनीयंएव
मधिकरणत्वमप्यविवक्षितंतादृशाधेयत्वानिरूपकत्वव्यापकत्वाभावेनिवेशनीयातादृशाधेयत्वानिरूपकवृत्तित्व
मात्रनिवेशेधूमवान्वन्हेरित्यादौवन्ह्यधिकरणत्वसामान्याभावस्यसाध्यनिष्ठाधेयत्वानिरूपकहृदादिवृत्तित्वादति
व्याप्तिरतोव्यापकतानिवेशः व्यापकत्वंचतद्वृत्तिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्वंतादृशप्रतियोगिता
नवच्छेदकीभूताभाववत्वादिकमादायवन्ह्यधिकरणत्वसामान्याभावस्यापिधूमनिष्ठाधेयत्वानिरूपकत्वव्यापकत
याधूमवान्वन्हेरित्यादावतिव्याप्त्यापत्तेः अनवच्छेदकत्वंचावच्छेदकतापर्याप्त्यनधिकरणत्वं अतोनोभयवद्भेदमा
दायदोषः अथवायदधिकरणतासामान्याभावत्वंसाध्यनिष्ठाधेयत्वानिरूपकवृसंताभावप्रतियोगितानवच्छे
दकत्वमेवसमुदायार्थः। अतोभाववत्वादिनाव्यापकतामादायनदोषः अधिकरणताचहेतुतावच्छेदकसंबंधावच्छि
न्नाग्राह्यातेनवन्हिमान्धूमादित्यादौवन्ह्यनधिकरणधूमावयवादौधूमाधिकरणत्वसामान्याभावसत्वेपिनक्ष
तिः धूमवान्वन्हेरित्यादौयत्किंचिद्वन्ह्यधिकरणत्वाभावस्यधूमानधिकरणत्वव्यापकतयातिव्याप्तिवारणायसा

मान्यपदं तथाच तादृशाधेयतानिरूपकत्वव्यापकाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नाधिकरणतात्वं यद्रूपावच्छि सिंह०
गदा०पं० न्नाधिकरणतात्वावच्छिन्नाभाववत्त्वं वा तादृशाधेयत्वनिरूपकत्वव्यापकतावच्छेदकं तद्रूपवत्त्वं व्याप्तिरिति फलितार्थः।
१७ तेन धूमानधिकरणत्वव्यापकीभूतवह्न्यधिकरणत्वधूमाधिकरणत्वोभयसामान्याभावप्रतियोगितायाः वह्न्यधिक
रणत्वसामान्यनिष्ठत्वेपि नातिव्याप्तिः। यदधिकरणतामात्रनिवेशे द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादावव्याप्तिः
द्रव्यत्वानधिकरणगुणादौ हेत्वधिकरणतावच्छिन्नाभावसत्त्वादतो यद्रूपावच्छिन्नेति हेत्वभावस्य व्यापकतानिवेशे
व्यापकताशरीरे हेतुतावच्छेदकसंबंधावच्छिन्नतद्वन्निष्ठत्वं निवेश्यं अन्यथा वह्निमान् धूमादित्यादौ साध्यनिष्ठा
धेयतानिरूपकाधिकरणे ह्रदादौ धूमात्मकाभावस्य कालिकसंबंधेन वृत्तेरव्याप्त्यापत्तेः तथाच सति सत्तावान् द्र
व्यत्वादित्यादावव्याप्तिः साध्यनिष्ठाधेयतानिरूपकाधिकरणे हेतुतावच्छेदकसंबंधेन वृत्तेरप्रसिद्धेरतो हेत्वधिक
रणत्वाभावस्य व्यापकताघटितमेव तल्लक्षणं कृतं तथाच अधिकरणताया विशेषणताविशेषेण वृत्तिमत्त्वया तेन
संबंधेन तद्वन्निष्ठत्वं निवेश्यमतो न दोषः पूर्वकल्पपरित्यागे बीजमाह तेनेति न दोष इति सामान्यादौ हेतुतावच्छे

दकसंबंधेनवृत्तेरप्रसिद्धावपितत्संबंधावच्छिन्नायाद्रव्यत्वाधिकरणतायाद्रव्येप्रसिद्धायाअभावस्यसाध्यानधिकर
णत्वव्यापकत्वादितिभावः साध्यवैयधिकरण्यस्यनिरुक्तार्थकत्वेपुनः पौनरुक्त्यं अतस्तद्व्याचष्टे। साध्यवैयधिकरण्य
मितिननुमूलेतदुभयमपिसाध्यानधिकरणानधिकरणत्वमित्यनेनोक्तलक्षणद्वयार्थानुवादोऽसंगतः असामाना
धिकरण्यवैयधिकरण्ययोरधिकरणताद्वयघटितत्वेनतादृशलक्षणयोरधिकरणतात्रयघटितत्वादनुवादेचाऽ
धिकरणत्वद्वयमात्रस्यनिवेशादित्यतस्तादृशमूलंसंगमयतिचरमाधिकरणत्वांशस्येतिअनतिप्रयोजनकत
येति अनधिकरणत्वस्याधिकरणत्वाभावरूपतयातद्घटकाधिकरणत्वांशंपरित्यज्यसाध्यासामानाधिकरण्या
भावसाध्यवैयधिकरण्याभावनिवेशनेनैवोपपत्तेरितिभावः। असामानाधिकरण्याद्यधिकरणत्वाभावस्याखं
डस्यासामानाधिकरण्याभावाद्यंघटितत्वेयानवैयर्थ्यमित्यनतिप्रयोजनकतयेत्युक्तं। तदपहाय्यचरमाधिकरण
त्वांशंपरित्यज्यद्वयंसाध्यासामानाधिकरण्याभावसाध्यवैयधिकरण्याभावरूपनिष्कृष्टलक्षणार्थद्वयं एकोक्त्या
साध्यानधिकरणानधिकरणत्वमित्यनेननसत्तावान्द्रव्यत्वादित्यादावव्याप्तिवारणायविवक्षितस्यप्रथमलक्षणनि

गदा०पं० क्लृप्तार्थस्य कथंचिदपि अनुवादतासंभवात्तदनुवादकतानुपपत्तिरितियथाश्रुतानुवादपरतया संगमयितुं अनुवाद
१८ नीयलक्षणद्वयार्थमाह। साध्येत्यादेरिति। लक्षणद्वयस्य क्रमेणेति शेषः। तत्ताभावइत्यंतेन प्रथमलक्षणार्थबोध
वि कत्वं कथनं एवंच साध्याभावाधिकरणानधिकरणशब्देन साध्यं यदधिकरणानधिकरणकं तद्बोध्यते तदुत्तरत्वप्रत्य
येन तत्त्वं साध्यपदोत्तरसन्निकृष्टनञा तदभावः प्रत्याय्यत इति प्रथमलक्षणार्थबोधकत्वं साध्यानधिकरणान
धिकरणत्वमित्यस्य न च साध्याधिकरणानधिकरणत्वपदेन नञ्पदसमासे ससेव तदर्थाभावो न आ प्रत्याय
यितुं शक्यते तथाच साध्यपदोत्तरनञ्निपातासंभवी समस्यमानपदपूर्वनिपतितस्यैव नञः साधुत्वात् अन्य
थाचित्रगुरित्यादौ चित्रादिपदोत्तरमपि नञ्निपातापत्तेरिति वाच्यं ससंबंधिकार्थबोधकोत्तरघटितसमुदा पद
येन समं नञ्समासस्थले नञो मध्यनिवेशस्यापि साधुत्वसंपादकत्वात् अन्यथा घटानधिकरणत्वं साध्याभाव
वद्वृत्तित्वमित्यादौ च घटाधिकरणत्वाभाववद्वृत्तित्वाभावप्रत्ययानुपपत्तेः न हि तत्रानधिकरणत्वादिपदान्नोघ
टादिपदस्य समासे तादृशार्थप्रतीतिरुपपद्यते अनधिकरणत्वादिपदजन्यप्रतीतिविशेष्यीभूताभावेन सममेव

२साध्याभाव

घटादिसंसर्गभानात्। समस्यमानपदप्रतिपाद्यतावच्छेदककोटिनिविष्टेनापरपदार्थान्वये राजपुरुषादन्यइत्यस्य
राजपुरुषइत्यादिसमासापत्तेः एवं नञ ऽन्वयितावच्छेदकावच्छिन्नाभावस्यैव बोधनात्। अधिकरणसामान्यभेदवाने
वानधिकरणपदार्थःस्यात्तस्यचाप्रसिध्यानभूपदाधिकरणपदयोः प्राथमिकसमासासंभवाच्चेति साध्यनिष्ठाधेय
तानिरूपकाधिकरणवृत्तित्वाभावरूपप्रथमलक्षणस्य निष्कृष्टस्य यथाश्रुतार्थोपि साध्यानधिकरणानधिकरणत्वश
ब्देन प्रतिपाद्यते तथाहि आधेयतानिरूपकार्थकचरमाधिकरणपदघटितेनाधिकरणानधिकरणपदेनाधिकरण
मनधिकरणं आधेयतानिरूपकंयस्येतिव्युत्पत्त्या अधिकरणनिष्ठभेदप्रतियोगितावच्छेदकीभूतनिरूपकताका
धेयतावत्त्वेनान्यपदार्थो बोध्यते बहुव्रीहौ विग्रहवाक्याद्यादृशविशेष्यविशेषणभावापन्नस्य बोधः तद्विपरीतविशे
ष्यविशेषणभावापन्नस्य प्रत्ययात् चित्रागौर्यस्येति विग्रहवाक्याद्यत्पदार्थसंबंधित्वेन चित्रगोश्चित्रगुरित्यतश्चित्र
गोसंबंधित्वेन यत्पदार्थस्य बोधनात् प्रकृतस्थले च विग्रहवाक्यादन्यपदार्थनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेद
वत्त्वेनाधिकरणप्रतीतिः एवं च साध्यं पदधिकरणानधिकरणं यदधिकरणनिष्ठभेदप्रतियोगितावच्छेदकीभूतनि

स्या

वृत्तित्वेन रूपेण नोक्तादि रूपाव्ययपदार्थः साध्याधिकरणानधिकरणपदे न तद्वृत्तिधर्मश्च साध्या



निरूपकताकाधेयतावदितिव्युत्पत्त्या साध्यनिष्ठाधेयतानिरूपकतावच्छिन्नभेदवदधिकरणवृत्तित्वं साध्याधिकरणानधिक
रणत्वशब्देन प्रसाध्यते तदभावश्च साध्यपदान्तरनिष्ठनञ्पदघटितवाक्येनेति द्वितीयलक्षणार्थमाह। साध्यस्येति। त
थाच साध्यानधिकरणमधिकरणं आधेयतानिरूपकं यस्येति व्युत्पत्त्या साध्यानधिकरणाधिकरणत्वशब्देन साध्यानधि
करणवृत्तित्वं प्रसाध्यते तदभावश्च द्वितीयनञेति उक्तशब्दस्य तदर्थानुवादकतेति भावः पूरणसंवलितं तन्त्रेति ग्रंथं
व्याचष्टे तत्वेत्यादिना मूले केवलान्वयिनि वन्हिमान् धूमादित्यादौ चाव्याप्तेर्हेतुत्वकथनात्प्रथमलक्षणे केवलान्वयि
न्यव्याप्तिहेतुं पूरयति साध्येत्यादिना अप्रसिद्ध्येति तेन साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनिवेशाभिप्रायेण
प्रथमप्रसिद्धिरभिहिताय त्किंचिन्निरूपकभेदनिवेशश्च तादृशभेदवदधिकरणे हेतोर्वृत्तेरव्याप्तिर्बोध्या वक्ष्यमाणक्र
मेण नानाव्यक्तिसाध्यकहेत्वन्तरेष्वव्याप्तिसत्त्वात् धूममात्रे तत्कथनं मूलकृतो मूलतासंपादकमतो धूमस्यापि
लक्षणत्वाभिप्रायेण पाठमधृत्वैव व्याचष्टे नानाव्यक्तिसाध्यकेति अत्रच यथासंभवमव्याप्तिर्बोध्या तेनेन हि
या वधर्मवाने तत्वादित्यादौ वक्ष्यमाणरीत्याव्याप्तिविरहेपि न क्षतिः अत एवाग्रे नानाधिकरणकेत्सर्वत्रेति वक्ष्यति

अथवानानाव्यक्तिसाध्यकइत्यस्यमिथोव्यधिकरणद्वयवृत्तिसाध्यतावच्छेदककइत्यर्थः।अन्नाव्याप्तेर्हेतुंपूरयतिएकसा
ध्यसाधनादिनाइतीसंतेनानयोरीसाव्याप्तिश्चयत्किंचित्साध्यनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेदनिवेशाभिप्रायेणसा
ध्यनिष्ठाधेयतानिरूपकसामान्यभेदःनिवेशश्चकेवलान्वयिन्यव्याप्तिरेवदोषइतिध्येयंकश्चिदितिपृथिव्यन्यत्वविशि
ष्टद्रव्यत्ववद्द्रव्यत्वादित्यादौअतिव्याप्तिरितिविशिष्टद्रव्यत्वस्यशुद्धद्रव्यत्वानतिरेकितयापृथिव्यादेःसाध्यनिष्ठाधेय
तानिरूपकतासंभवादितिभावः आधेयतायांसाध्यतावच्छेदकावच्छिन्नत्वनिवेशेचनैषदोषःअधिकरणतानि
रूपकतावच्छेदकस्यैवाधेयतावच्छेदकतयापृथिवीनिष्ठाधिकरणतानिरूपकतानवच्छेदकपृथिव्यन्यत्वविशिष्टद्र
व्यत्वत्वादेःपृथिवीनिरूपिताधेयतानवच्छेदकत्वादितिध्येयंद्वितीयलक्षणेसाध्यवत्तावच्छिन्नप्रतियोगिताकभे
दनिवेशश्चधूमादौनाव्याप्तिस्तत्कल्पकेवलान्वयिसाध्यकाव्याप्तिरेवयत्किंचित्साध्यवद्व्यक्तिभेदनिवेशेचोभयस्थ
लएवाव्याप्तिरितिमूलाभिप्रायंस्फुटयतिद्वितीयचेत्यादिनासाध्यवत्तावच्छिन्नप्रतियोगिताकभेदःसाध्यवैयधि
करण्येविवक्षितःइतियोजनासाध्यवैयधिकरण्यघटकतयाविवक्षितइत्यर्थः।केवलान्वयिनिकेवलान्वयिन्येव त्व

गदा० पं०
२०

सार्व०

नानाधिकरणकेति एकव्यक्तिसाध्यकेपि सत्तावान्द्रव्यत्वादित्यादावेकस्य साध्यवतो भेदेन्यस्मिन्साध्यवति सत्तादव्या(स्या)
प्तेर्नानाव्यक्तिसाध्यकेपि एतद्वृत्तियावद्धर्मवान्नतत्वादित्यादावव्याप्त्यसंभवान्नानाव्यक्तिसाध्यकेतिनोक्तं तथाच द्वि
तीयलक्षणाभिप्रायकत्वे धूमइति मूलं नानाधिकरणसाध्यकसामान्योपलक्षणमिति भावः। साध्यासामानाधिक
रण्यानधिकरणत्वमित्यत्र साध्यासामानाधिकरण्यपदेन साध्याधिकरणवृत्तित्वाभावविवक्षणेपि द्रव्यं सत्वादित्या
दावतिव्याप्तिर्नसंभवति सामानाधिकरण्यस्याव्याप्यवृत्तितया सत्तादावपि गुणाद्यवच्छेदेन द्रव्यत्वादिसामानाधि
करण्याभावसत्वात् किंतु वन्हिमान्धूमादित्यादावव्याप्तिः स्वावयवावच्छेदेन धूमादौ वन्ह्यादिसामानाधिकरण्या
भावसत्वात् सापि हेतुतावच्छेदकसंबंधेन यद्धेतुमत्तदवच्छिन्नत्वेनाभावं विशेष्य वारयितुं शक्यत इत्यभिप्रायेण
तत्पदं तादृशाभावपरतया वर्णयतः सार्वभौमस्य मतमुपन्यस्यति केचित्विति हेत्वधिकरण इति सप्तम्यर्थो भावा
न्वितमवच्छिन्नत्वं तेनैव संबंधेनेति तृतीयार्थोपि वृत्यन्वितमवच्छिन्नत्वं वृत्तिपदस्य संबंधार्थकत्वे तु अभेद एव तद
र्थः। अनधिकरणत्वपदस्याधिकरणत्वाभावोऽभावमात्रं वा यथार्थः। स्यान्तदा व्याप्यवृत्त्यधिकरणतायाः अपि अ

बाभा

व्याप्यवृत्तितयासत्वादौद्रव्यावच्छेदेनसाध्यसामानाधिकरण्याभावाधिकरणत्वाभावस्यसामानाधिकरण्यरूपत
दभावस्यचाक्षतत्वादतिव्याप्तिस्तदवस्थैवेत्यनधिकरणपदमधिकरणभेदवदर्थकतयाव्याकरोतितदधीतियद्यप्य
धिकरणभेदेनाभावभेदाभावात्संयोगादिनाधूमाधिकरणपर्वतावच्छिन्नोयःसंबंधांतरेणतद्वृत्तिरूपादिनिष्ठव
न्ह्यादिमत्संयुक्तत्वाभावस्तस्यैवस्वावयवावच्छेदेनधूमादौवर्तमानतयाधूमादेस्तादृशाभावानधिकरणत्वंदुर्घटं
तथापितादृशाहेत्वधिकरणावच्छिन्नत्वविशिष्टाभावानधिकरणत्वस्यैवविवक्षणीयतयानदोषःरूपेपर्वतेनवन्हिम
त्संयुक्तत्वमितिवद्धूमेपर्वतेनवन्हिमत्संयुक्तत्वमितिप्रतीत्यनुदयात्पर्वतावच्छिन्नत्वविशिष्टनिरूपिततास्यावन्हिम
त्संयुक्तत्वाभावीयविलक्षणाधिकरणतायारूपादावेवोपगमात् अभावाधिकरणतायामेववाधिकरणविशे
षावच्छिन्नत्वंनिवेशनीयंतावतापिधूमरूपयोरभिन्नस्याप्यभावस्यपरस्परानवच्छेदकावच्छिन्नाधिकरणताभे
देनकथितदोषनिराकरणसंभवात्उभयत्रहेतुतावच्छेदकसंबंधप्रवेशप्रयोजनंक्रमेणदर्शयितितेनेतिस्वा
वयवेसंयोगेनावृत्तावपीत्यन्वयः तथाचस्वावयवावच्छेदेनसाध्यवत्संयुक्तत्वासत्वेनतदभावस्याक्षततयाप्रथ

मतोहेतुतावच्छेदकसंबंधानिवेशेस्वावयवरूपस्वाधिकरणावच्छिन्नसाध्यवत्संयुक्तत्वाभावानधिकरणत्वविरहेणसं 
योगेनधूमहेतौकस्यापिसाध्यस्यव्याप्तिर्नस्यादितिभावः।यद्यपितादृशसंबंधानिवेशेपिवह्निमत्संयुक्तत्वादेः।कालि
काव्याप्यवृत्तितयाधूमादावुत्पत्तिकालावच्छेदेनवह्निमत्संयुक्तत्वाभाववृत्तेःपर्वतादेरपिकालोपाधितयातादृशाभा
वावच्छेदकत्वाद्व्याप्तिताद्वस्थ्यंतथापीदानीमितिप्रतीतिनियामककालस्यावच्छेदकत्वादिहेतिप्रतीतिनियामक
देशनिष्ठावच्छेदकतायावैलक्षण्यंदुरपह्नवंयदभावात्पर्वतेधूमेनवह्निमत्संयुक्तत्वमितिप्रत्ययाभावोहेतुतमलि
धृतादृशावच्छेदकतानिरूपकत्वमेवाभावेनिवेश्यमतोनदोषः नचकालोपाधेरवच्छेदकतायामवच्छेद्याधिकरणेना
वच्छेदकस्यकालिकसंबंधोनियामकः।इत्थंचतादृशसंबंधानवच्छिन्नत्वमेवदेशस्यावच्छेदकतायांवैलक्षण्यंअन्य
स्यदुर्वचत्वात्।तथाचव्यभिचारिणिकालिकसंबंधेनहेतौवर्तमानेसाध्यसामानाधिकरण्याभावव्यभिचारनिरू
पकाधिकरणीयावच्छेदकतायांकालिकसंबंधानवच्छिन्नत्वविरहादतिव्याप्तिरितिवाच्यं।कालिकव्याप्यवृत्तावपि
कालिकसंबंधघटितात्मत्वाकाशत्वाद्युभयसामानाधिकरण्येदैशिकसंबंधेनात्मत्वाद्यनधिकरणकालस्यदेश

विधेयैवावच्छेदकत्वात्। कालविधया तस्यावच्छेदकत्वे तादृशसामानाधिकरण्यस्य कालिकाव्याप्यवृत्तित्वापत्तेः कालि
कसंबंधानवच्छिन्नत्वादन्यस्यैव वैलक्षण्यस्य देशविधयावच्छेदकतायां स्वीकरणीयत्वात्। हेत्वधिकरणइत्यत्र हेतुपदं अ
धिकरणभिन्नत्वानुयोगितत्त्वेतुपरं अतो धूमाद्यंतरसंयुक्तस्वावयवाद्यवच्छेदेन धूमादेस्तादृशाभावत्वेपि न क्षतिः एवं
च व्याप्तेः प्रति धूमादि भिन्नत्वेपि केनापि रूपेणानुगतानां तासां धूमत्वादिकमेवावच्छेदकं यत्तु हेतुपदं हेतुतावच्छेदका
वच्छिन्नपरमेव हेतुतावच्छेदकसंबंधेन स्वानुयोगिनो यदधिकरणं तदनवच्छिन्नायायाधिकरणतातदन्यत्वेनँ सामा साध्य
नाधिकरण्याभावाधिकरणताया विशेषणीयत्वान्नेष दोषः न वाननुगमः एवं च कालोपाधिविधया हेत्वधिकरणदेशस्या
वच्छेदकत्वेनोक्तदोषस्य हेतुतावच्छेदकसंबंधावच्छिन्नावच्छेदकत्वनिवेशेनापि वारणसंभवः पर्वतरूपादौ हेतुतावच्छेदक
संबंधावच्छिन्नपर्वतादिनिष्ठावच्छेदकताकसाध्यसामानाधिकरण्याभावँत्वाप्रसिद्धावपि रूपादिनिष्ठसाध्यसामानाधि व
करण्याभावाधिकरणतायां धूमादिप्रसिद्धनिरुक्ताधिकरणतानां भेदस्याक्षततया तदन्यत्वेन धूमादौ लक्षणसमन्व
यादिति तन्न साधु तथा सति किंचित्सग्निमदोषासंगतेः। गगननिष्ठसाध्यसामानाधिकरण्याभावाधिकरणतायास्त्वे

गदा०पं० क्ताधिकरणताभिन्नायाप्रसिद्धेः वह्निमत्त्वेति तथा च तेनैव संबंधेन समनुत्कापि किंचित्संबंधेन सक्तोपर्वताद्यवच्छिन्नवह्नि सार्व०
मत्संयुक्तत्ववत्यपि तदवच्छिन्नवह्निमत्समवेतत्वाभावसत्वात् धूमस्य वह्निव्याप्यत्वं नोपपद्यत इति भावः। साध्यवत्संबंधत्व
२२ सामान्याभावनिवेशे वह्निमत्समवेतत्वसामान्याभावस्य लक्षणाघटकत्वेपि हेत्वधिकरणविशेषावच्छिन्नसाध्यवत्संबंध
त्वसामान्याभावस्याप्रसिध्याऽसंभवो बाध्यः साध्यवत्संबंधस्य हेतुमति संबंधासंभवाद् वच्छेद्याधिकरणसंबंधेन ए
वावच्छेदकत्वयात न्निष्ठाभावे हेतुमतोऽनवच्छेदकत्वात् न क्षतिरिति नाव्याप्तिः नासंभवश्चेत्यर्थः। साध्यवत्तासाध्यताव
हेतौ च्छेदकसंबंधेन बाध्या तेन समवायेन वह्नौ साध्ये संयोगेन धूमे पर्वताद्यवच्छिन्नवह्निमद्वृत्तित्वसामान्याभावास्यास
त्वेपि नातिव्याप्तिः न वा सद्धेतावपि यत्किंचित्संबंधेन यः साध्यवान् तद्वृत्तित्वाभावस्य स्वाधिकरणावच्छेदेन सत्वेपि दोषः
साध्यं चोपलक्षणविधया भावप्रतियोगितावच्छेदककोटौ निवेशनीयं न तु विशेषणविधया तेनोत्पत्तिक्षणावच्छि
न्नघटादौ गंधाद्यसत्वात्तादृशघटाद्यवच्छेदेन पृथिवीत्वादौ गंधादिविशिष्टवृत्तित्वाभावसत्वेपि गंधवान् पृथिवीत्वा
दित्यादौ मूलावच्छिन्नवृक्षादौ कपिसंयोगाद्यभावसत्वात्तादृशवृक्षाद्यवच्छेदेन तद्वृक्षत्वादौ कपिसंयोगादिविशि

ष्टवृत्तित्वाभावस्तत्वेपि कपिसंयोग्येतद्वृक्षत्वादिसाध्ये नाव्याप्तिः तत्र कालदेशावच्छिन्नतत्तदधिकरणावच्छेदेनापि तत्रत
त्रहेतौ तादृशसाध्योपलक्षितधर्मिवृत्तित्वसत्वात् नचैवमपि धूमादौ पर्वतादिवृत्तेरनवच्छेदको यो देशः कालो वा तदवच्छि
न्नपर्वताद्यवच्छेदेन वन्ह्यादिसमानवृत्तित्वाभावस्य धूमादौ सत्वादव्याप्तिर्दुर्वारैवेति वाच्यं तद्देशकालावच्छिन्नपर्वतादेर्धूमा
द्यसंबंधितया धूमादेरभाववत्तावपि तादृशस्यानवच्छेदकत्वात् नचैवमुत्पत्तिक्षणादिविशिष्टपर्वते धूमस्य नववन्हि
मत्संयुक्तत्वमित्यादिप्रतीत्यनुपपत्तिः द्रव्यत्वे गुणेन पृथिवीत्व सामानाधिकरण्यमित्यादिप्रतीतिवदुक्तप्रतीतेः सामा
नाधिकरण्यावच्छेदकताभावावलंबनत्वानसंभवति विशेष्यस्यावच्छेदकत्वे विशिष्टस्यानवच्छेदकत्वासंभवादिति वा
च्यं। तादृशप्रतीतीनां सामानाधिकरण्ये विशिष्टपर्वताद्यवच्छेद्यत्वाभावावगाहित्वेनैवोपपत्तेः। उत्पत्तिक्षणपर्वते धूमस्य
नववन्हिमत्संयुक्तत्व मित्यादौ पर्वतावच्छिन्नं यद्धूमस्य वन्हिमत्संयुक्तत्वं तस्योत्पत्तिक्षणो नावच्छेदक इत्यादिरप्यर्थः। धूम
निष्ठवन्हिमत्संयुक्तत्वाभावे उत्पत्तिक्षणपर्वतोभयावच्छिन्नत्वं तु नार्थः। पर्वतस्य प्रतियोग्यवच्छेदकतया तदंतर्भावेण
द्वयोरभावावच्छेदकत्वस्यासंभवात्। घटपटोभयो घटत्वाभावाधिकरणतावत्। एतेनोक्तोभयावच्छिन्नसाध्यसा

केचित्तु

गदा०पं० मानाधिकरण्याभाववत्त्वमावर्तनायहेत्वधिकरणमात्रावच्छिन्नत्वप्रवेशनं केषांचिदनुपादेयमेव तथा सति ॥ तिव्याप्तिप्रसं सार्व०
गात् विशिष्टपर्वतादेरवच्छेदकतामादाया व्याप्तिवारणाया वच्छेदकांतरानवच्छिन्नहेत्वधिकरणवच्छिन्नत्वस्य भावे निवेशनी
२३ १+न्यादिनिष्ठधूमसामानाधिकरण्याभावस्याप्ययोगोलकस्यावयवोभयावच्छिन्नतया हेतुतावच्छेदकसंबंधेन हेतुमन्मात्रान
वच्छेद्यतया + यं एवं च पर्वतादेः कालविधया धूमनिष्ठवन्हिमत्संयुक्तत्वाद्यभावावच्छेदकस्यापि व्यावृत्तिः पर्वतादेः स्थूलत ख
या वन्हिमत्संयुक्तत्वादिरूपप्रतियोगिनोप्यवच्छेदकतात् तन्निष्ठाभावावच्छेदकताया अविरोधायावांतरकपालावच्छिन्नतो
पगमादित्याहुः हेतुमत्संबंधे साध्यसामानाधिकरण्याभावस्योक्तयुक्त्या हेत्वधिकरणवच्छिन्नत्वविरहाधेनु तानवच्छेदक
संबंधेन हेतुमत्संबंधे हेतुमदवच्छिन्नतादृशाभावप्रसिद्धिमाह ॥ तादृशेति ॥ हेतुतावच्छेदकसंबंधेन साध्यवद्वृत्तित्वस्य तत्
नसंबंधेन हेत्वधिकरणवच्छिन्नाभावस्येत्यर्थः ॥ तन्नैव तादृशहेतुमत्सेवन्नच तथा विधरूपादौ वन्हिमत्संयुक्तत्वाद्यभा
वाव्याप्यवृत्तिरेवेति तत्राधिकरणविशेषस्यावच्छेदकत्वं निर्युक्तिकं प्रतियोगिमत्सभाववृत्तादेव विरोधभंजनार्थमव
च्छेदकभेदापेक्षणात् ॥ धूमवत्कपालादिसमवेतवन्हिमन्महानसादिसंयुक्तघटादौ महानसाद्यवच्छेदेन वन्हिमत्सं

युक्तत्ववतिहेतुमत्कपालाद्यवच्छेदेनवह्निमत्संयुक्तत्वाभावसौलभ्येपिएतद्रूपवानेतद्रसादिस्यादेःएतद्रूपवत्समवेतत्व
वतिहेत्वधिकरणावच्छेदेन साध्यसामानाधिकरण्याभाववत्त्वसंभवात् एतद्रूपादिमत्तिसंबंधांतरेणवर्त्तमानेसाध्यव
त्समवेतत्वाभावस्यव्याप्यवृत्तितयाहेत्वधिकरणानवच्छिन्नत्वात् निरुक्ताभावाप्रसिद्धेर्दुर्वारत्वादितिवाच्यंपर्वतत्वरूपेन
वह्निमत्संयुक्तत्वमितिप्रतीतिबलेनव्याप्यवृत्तेरपिसामानाधिकरण्याभावस्याधिकरणविशेषावच्छिन्नत्वोपगमा
त् यत्तुव्याप्यवृत्तेरभावस्याधिकरणविशेषावच्छिन्नत्वानुपगमेहेतुतावच्छेदकसंबंधावच्छिन्नसाध्यवद्वृत्तित्वाभावा
धिकरणतासामान्येहेत्वनुयोगिकत्वहेत्वधिकरणविशेषावच्छिन्नत्वोभयाभावोविव क्षणीयः तथाचरूपादिनिष्ठ
वह्निमत्संयुक्तत्वाद्यभावाधिकरणतायांधूमादिनिष्ठस्वावयवाद्यवच्छिन्नतदधिकरणतायांहेतुतावच्छेदकसंबंध
नहेतुमदवच्छिन्नत्वस्यघटादिनिष्ठधूमवत्कपालाद्यवच्छिन्नतदधिकरणतायांचहेत्वनुयोगिकत्वस्याभावेनोभया
भावसत्वाल्लक्षणसमन्वयइतितन्नव्याप्यवृत्तेरवच्छेदकत्वानुपगमेपृथिवीरूपादिस्यादावतिव्याप्तिःपृथिवीत्वादि
व्यभिचारिजलीयरूपादिनिष्ठसामानाधिकरण्याभावस्यव्याप्यवृत्तितयातदधिकरणतासामान्येनिरुक्तोभयाभा

गदा० पं० वस्याक्षतत्वात् अथ हेत्वधिकरणावच्छिन्नत्वस्थाने ऽवच्छिन्नत्वहेत्वधिकरणानवच्छिन्नत्वोभयाभावस्यैव निवेशनीयत्वान्ना सार्व०
यं दोषः जलरूपादिनिष्ठपृथिवीसमवेतत्वाभावाधिकरणतायामवच्छिन्नत्वविरहेणोभयाभावसत्वात्तावतैव दर्शिता
२४ प्रसिद्धेरपि निवारितत्वात्तादृशोभयाभाववदधिकरणतावदत्यन्तमेव निवेशनीयं न तूक्ताधिकरणतासामान्ये हेत्वनु
योगिकत्वतादृशोभयाभाववत्वोभयाभावः प्रयोजनविरहादिति चेदेवमपि वक्ष्यमाणायाः कालिकसंबंधेन हेत्वव
व्याप्तेरसंगतिर्दुर्वारैव तत्र कालिकसंबंधेनावृत्तेर्गगनादावेव दर्शितोभयाभाववत्साध्यसामानाधिकरण्याभावा
धिकरणतायाः प्रसिद्धेः अवृत्तावेव सर्वत्र तादृशाभावप्रसिध्या संबंधांतरेण वर्तमानपर्यंतानुधावने विरोधश्चेत
स्या व्याप्यवृत्तेरवच्छेदकत्वमेव ग्रंथकारानुमतमित्यवधेयं द्रव्यं सत्वादित्यत्राशंकितातिव्याप्तिमुद्धरति व्यभिचारिण
श्चेति। तादृशेतिहेतुतावच्छेदकसंबंधेन हेतुमतीत्यर्थः॥ अवच्छेदकत्वं सत्सम्यगर्थः तादृशाभाववत्वं हेतुतावच्छेदक
संबंधेन साध्यवद्वृत्तित्वाभाववत्वं अत्र प्रमाणाकांक्षायामाह सत्तायामिति तादृशप्रतीत्या द्रव्यत्वसामानाधिकरण्य
वत्तामपि सत्तायां तदनवच्छेदकगुणाद्यवच्छेदेन तदभाववत्तावगाहनादिति भावः॥ एवं। सत्तायां द्रव्यत्वसामानाधिक

रण्याभावोपगमे विशिष्टसत्वे गुणाद्यन्यत्वविशिष्टसत्तात्वावच्छिन्ने। अव्याप्तिरिति। गुणाद्यवच्छेदेन साध्यसामानाधिक
रण्याभाववत्त्वसंकेनापि निरूपेणतदनधिकरणत्वासंभवादिति भावः॥ विशिष्टस्येति। तथा च विशिष्टसत्वं द्रव्यमात्रव
त्ति तदधिकरणत्वं न गुणादेरिति न हेत्वधिकरणावच्छेदेन हेतौ साध्यसामानाधिकरण्याभाववत्त्वमिति नाव्याप्तिरि
ति भावः॥ यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छिन्नत्वं निवेश्यापीयमव्याप्तिः शक्यते वारयितुं तथापि प्र
कारांतरेणाव्याप्तिवारणसंभवे लक्षणेऽधिकनिवेशनमनुचितमित्यभिप्रेत्य विशिष्टस्यातिरिक्तत्वपक्ष आश्रि
तः॥ न च हेतुतावच्छेदकविशिष्टाधिकरणतानिवेशनमावश्यकं अन्यथा इदं स्पर्शवत् भूतत्वमूर्तत्वोभयस्मा
दित्यादौ भूतत्वे मूर्तत्वे च हेतौ स्वाधिकरणे गगने मनसि च साध्यसामानाधिकरण्यविरहेणाव्याप्तिप्रसंगादिति
वाच्यं। उभयत्वस्यैकविशिष्टापरत्वनूपतामवलंब्य विशिष्टस्यानतिरिक्तत्वेन। तत्त्वस्वावच्छिन्ननिरूपिताधिकरणत्व
रूपपरंपरासंबंधेनोभयत्वस्यैव हेतुत्वमिति स्वीकृत्यैव वा तत्राव्याप्तेः समाधानसंभवात्। ननु द्रव्यं गुणाद्यन्यत्वे
सति सत्तादित्यादौ विशिष्टस्यातिरिक्ततापक्षमवलंब्याव्याप्तेर्वारणं न विचारसहं तथा हि गुणादिरन्तिसत्वादि

तोगुणाद्यनवविशिष्टसत्तादेरतिरिक्तेऽनुगतधर्ममात्रोच्छेदः एकव्यक्तिवृत्तित्वविशिष्टस्यापरव्यक्तिवृत्त्यन्यत्वात्तेन सार्व०
ग दा० च तत्तद्व्यक्तिवृत्तित्वविशिष्टसत्तादीनां मिथो भेदेऽपि शुद्धसत्तादिकमनुगतं निराबाधमेवेति वाच्यं। शुद्धसत्वादेस्तत्त
२५ द्व्यक्तिवृत्तित्ववैशिष्ट्याभ्युपगमे भवतां तदेकत्वासंभवात्। तदनभ्युपगमे तस्यावृत्तित्वप्रसंगात्। एवं सर्वेषामेव वस्तू
नां तत्तत्क्षणवृत्तित्वरूपविशेषणभेदाद्भेदप्रसक्त्या क्षणभंगापत्तिपर्यवसानं दुर्वारमेव अथ प्रत्यभिज्ञाद्यनुरोधे
न एकस्मिन्नानादेशकालवृत्तित्ववैशिष्ट्यं स्वीक्रियत एव परंतु गुणे द्रव्यवृत्तित्वविशिष्टसत्ता नास्तीदानीं पूर्वक्षणवृ
त्तित्वविशिष्टघटत्वं नास्तीति प्रतीत्यनुरोधेन मिथो भिन्ना अपि तत्तद्विशेषणविशिष्टसत्त्वघटत्वादयः स्वीक्रियंते
तदवलंबने नैव तादृशप्रतीत्युपपत्तिः द्रव्यवृत्तित्वादिवैशिष्ट्यपुरस्कारेणानुगतत्वादेर्न द्रव्यत्वानुमापकता स्वीक्रि स
यते अपि तु तदन्यतादृशविशेषणविशिष्टगुणाद्यवृत्तिवस्तुन एवेति तत्र द्रव्यत्वादिव्याप्तिविरहेऽपि न क्षतिरिति चे
त् तादृशवस्तूनां केन रूपेण व्याप्यता न द्रव्यवृत्तित्वादिविशिष्टत्वेन तादृशरूपस्याव्याप्यानुगतधर्मसाधारण्यात्।
नापि तादृशविशेषणविशिष्टतद्व्यक्तित्वादिना तादृशविशेषणवैशिष्ट्यांशस्य वैयर्थ्यात् तद्व्यक्तित्वानुपस्थिताव

ऽनुमाननिर्वाहाच्च एवं विशिष्टसत्तानास्तीत्यत्र विशिष्टसत्तात्वावच्छिन्नाभावस्य न विषयतासंभवः तद्रूपावलीढानुगत
सत्तावत्तित्तद्रूपावच्छिन्नाभावासंभवात्। नापि तत्तद्व्यक्तित्वावच्छिन्नाभावस्य तत्तद्व्यक्तित्वस्य प्रतियोगिकोटावनुल्लेखात्।
विशेषणावच्छिन्नप्रतियोगिकसंबंधो। विलक्षणः सत्त्वनानुगतसत्तायाः संबंधोपि तत्तिरिक्तः विशिष्टसत्ताया एवेति प्र
तियोगितावच्छेदकधर्मस्य गुणादिवृत्तिसत्तासाधारण्येपि तत्र विशिष्टाभावोक्षत एव प्रतियोगितावच्छेदकावच्छिन्नप्र
तियोगिकसंबंधशून्यत्वमात्रस्य विशिष्टाभावसत्वेऽपेक्षितत्वादिति चेत्तर्हि गुणादिसाधारणसत्ताया एव तादृशा
तिरिक्तः संबंधः स्वीक्रियतां किं सत्तांतरकल्पनेनेत्यभिप्रेत्याह। अनतिरिक्तेति विशेषणविशेष्यसंबंधस्यैवेति सत्व
गुणाद्यन्यत्ववैशिष्ट्यस्यैवेत्यर्थः परंपरया परंपरासंबंधेन स्वावच्छिन्ननिरूपितसमवायादिसंबंधेनेति यावत्। व्याप्य
त्वादिति गुणाद्यन्यत्ववैशिष्ट्यावच्छिन्नाधिकरणतायां गुणादाववृत्तित्वात्तादृशसंबंधेन तद्वैशिष्ट्यस्य द्रव्यमात्रवृत्तित्वा
व्याप्यत्व
दिति भावः। एवकारेण सत्तायां व्यवच्छेदः यत्र विशेषणवैशिष्ट्यावच्छिन्नसत्तादिहेतुकद्रव्यत्वाद्यनुमितिरभिमता तत्र त
द्वैशिष्ट्यहेतुकानुमितिरेवापेयते वैशिष्ट्यपरंपरासंबंधेन व्याप्तिधीविरहेपि चानुमितिरसिद्धैवेति भावः यद्यपि वि

शिष्टनिरूपितसंबंधस्यविलक्षणत्वेतादृशसंबंधेनसत्ताया अपिव्याप्यत्वंनिर्वहतितथापिविशेषणतावच्छिन्ननिरूपितस 
मवायत्वादिनानसत्वादिसंबंधताकिंतुविशिष्टसत्तावानितिप्रसंगेवैशिष्ट्यस्यैवसत्तादिविशेषणतापन्नस्योक्तपरंप
रासंबंधेनधर्मिणिविशेषणत्वोपगमान्नातिप्रसंगशंकेत्याशयेनेदमभिहितं।नन्वेवंरीत्याप्रथमलक्षणपरिष्कारेवक्ष्य
माणकेवलान्वयिसाध्यकाव्याप्त्यसंगतिःतत्रापिसंबंधांतरेणहेतुमद्वृत्तौहेत्वधिकरणावच्छिन्नसाध्यसामानाधिकरण्या
भावप्रसिद्ध्यालक्षणगमनसंभवादतआहकेवलान्वयिनीतिद्वितीयलक्षणेति।नचतत्रैसनेनोभयत्वावच्छिन्नस्यै
वपरामर्शात्प्रथमलक्षणेव्याप्यभावेऽसंगतिर्दुर्वारैवेतिवाच्यंकेवलान्वयिसाध्यकेधूमेऽव्याप्तिप्रदर्शनात्तदुभ
यत्वेनोपस्थितेपिलक्षणद्वयेयथायोगंतत्तत्स्थलेऽव्याप्त्यन्वयेतात्पर्यात्यद्यपिधूमादावपिसाध्यसामानाधिकर
ण्यसामान्याभावघटितस्यप्रथमलक्षणार्थस्यनाव्याप्त्यवकाशःतथापियत्किंचित्साध्यव्यक्तिभेदनिवेशाभि
प्रायेणद्वितीयलक्षणस्यैवयत्किंचित्साध्यसामानाधिकरण्याभावनिवेशाभिप्रायेणैवप्रथमलक्षणस्यापिना
नाव्याप्तिसाध्यकेव्याप्तिप्रदर्शनसंभवइहत्यंमूलंयत्किंचित्साध्यानधिकरणाधिकरणइत्युपलक्षणं।यत्किंचित्साध्या

धिकरणवृत्तावित्यपिबोध्यं तेन प्रथमलक्षणव्याप्तिसंपादकत्वकथनान्न्यूनत्वस्य नावकाश इत्यवधेयं सामानाधिक
रण्यस्याव्याप्यवृत्तितायां प्रमाणसिद्धायामेव दर्शिताति व्याप्तिर्वारयितुं शक्यते तत्त्वेव न प्रमाणमुक्तप्रतीतेरन्यविषयक
त्वादित्याह। सत्तायामिति। प्रतीतिर्हीति अभावं गुणेवगाहत इत्यनेनान्वयः। अवच्छेदकत्वस्येति निरूपकत्वस्येत्यर्थः। तेन
सामानाधिकरण्यस्याव्याप्यवृत्तितामते तदवच्छेदकत्वस्याप्रामाणिकत्वेपि न क्षतिः उक्ताकारकप्रतीतेरवच्छेदकतानु
ल्लेखात् अवच्छेदकताभावावगाहिता न संभवतीत्याशंक्याह। परंपरेति। ननूक्तपरंपरासंबंधो न वृत्तिनियामकः आ
काशं द्रव्यत्वसामानाधिकरण्यवदित्यप्रत्ययादित्युक्तसंबंधावच्छिन्नाभाव एवाप्रामाणिक इति तादृशाभावावलंबन
तापि नोक्तप्रतीतेः संभवतीत्याशंकोद्धारण्यानुरूपं दृष्टांतमाह। द्रव्यत्व इति गुणस्यावच्छेदकता नियामकद्रव्यत्वसंबं
धवत्त्वं तया द्रव्यत्वनिष्ठाभावावच्छेदकत्वं न संभवतीत्यगत्या गुणनिष्ठाद्रव्यत्वपृथिवीत्वसामानाधिकरण्यावच्छेदक
त्वस्य परंपरासंबंधेन तादृशसामानाधिकरण्यस्यवाऽभाव एव तादृशप्रतीतिविषय इत्यवश्यमुपेयं तद्वदत्रापी
त्यर्थः। स्वरसतो यादृशशब्दाद्यादृशोऽर्थः प्रतीयते तादृशशब्दोल्लिखितप्रत्यये तादृशार्थविषयकत्वमेवास्तिति वा

गदा०पं० धके युज्यते इत्याशयेन दर्शितप्रतीतेः सत्तायां गुणावच्छिन्नद्रव्यवृत्तित्वाभावावगाहितायां बाधकप्रतीतिमाह। सत्ता नद्र सार्व०
व्यवृत्तित्वाभाववतीति न च द्रव्यवृत्तित्वाभावाभावस्य द्रव्यवृत्तित्वरूपस्य सत्तायामसम्मतेपि सत्वान्नैतस्याः प्रतीतेर्बा
२७ धकत्वं संभवति विरोध्यविषयकत्वादिति वाच्यं तादृशभेदेन द्रव्यवृत्तित्वाभाववद्भेदस्यैव प्रत्यायनात्तदाकारप्रती
तेरपि तद्भेदावगाहितया बाधकत्वात्। भेदस्याव्याप्यवृत्तिताविरहेण सामानाधिकरण्याभावद्भेदस्य तदभावविरोधि
त्वात् यदि च भेदस्याव्याप्यवृत्तित्वमतमवलंब्य तादृशप्रतीतेर्विरोध्यविषयकत्वमुपपाद्यते तदा सत्तायां द्रव्यत्वसा
मानाधिकरण्याभावेपि तदधिकरणभिन्नत्वस्यास्ततया तिव्याप्तिवारणमशक्यमिति भावः। अव्याप्यवृत्तित्वसाध
कदर्शितप्रतीतेरभावरूपविशेष्ये सत्तावृत्तित्वावगाहिताया उपगमात्तत्तु सत्ताविशेष्यकद्रव्यवृत्तित्वाभाववद्भेद
प्रकारकप्रतीतिमुपेक्ष्य तत्ताभावविशेष्यकसत्तावृत्तित्वविरोधिविषयकप्रत्ययं बाधकतयोपन्यस्यति द्रव्यावृत्ति
त्वाभाव इति यद्यपि द्रव्यवृत्तित्वाभावे सत्तावृत्तित्वं गुणाद्यवच्छेदेन न तु द्रव्यावच्छेदेनेति तदवच्छेदेन तत्र सत्तावृ
त्तिताभावः संभवति एवं सत्तावृत्तित्वं सत्तात्वसामानाधिकरण्यरूपं सामानाधिकरण्यस्याव्याप्यवृत्तितामतेऽ

व्याप्यवृत्तीतितदनवच्छेदकगुणत्वावच्छेदेन द्रव्यवृत्तिताभावे तदभावःसंभवत्येवेति न विरोधः तथाप्युक्तयुक्त्या दर्शित
प्रतीतेः सत्तावृत्तिभेदावगाहितया बाधकत्वं दुर्वारमेव यत्तु सत्तावृत्त्यावच्छेदकभेदेन सत्तावृत्तिताभावसंभ
वेपि अवच्छेदकाप्रतीतिदशायां जायमानतत्र सत्यसत्तावृत्तित्वग्रहप्रतिबंधकतया तदुत्तरं जायमानायाः सत्ता
यां गुणेन द्रव्यत्वसामानाधिकरण्यमिति प्रतीतेः सामानाधिकरण्याभावे सत्तावृत्तित्वावगाहितासंभवेन गुणनि
ष्ठसामानाधिकरण्यावच्छेदकताभावावगाहित्वे सर्वत्रैव तदवगाहित्वकल्पनमुचितमिति भाववर्णनं तदसत् ए
वं सति अवच्छेदकाविषयिण्याः द्रव्यत्वसामानाधिकरण्यत्वेन सत्तायां तत्सामानाधिकरण्यविषयकप्रतीतेरपि
बाधकतासंभवेन सत्ता न द्रव्यवृत्तिताभाववतीत्यादिप्रतीतिपर्यंतानुधावनस्य निर्बीजतापातात्। नन्वेवं संयो
गादिमति संयोगादेरप्यभावो मास्तु तत् मूलेन कपिसंयोगइत्यादिप्रतीतेरपि मूलनिष्ठकपिसंयोगाद्यवच्छेदक
ताभावालंबनतयोपपत्तेरित्यत आह बाधकाभावादिति तत्र कपिसंयोगाभावो वृक्षावृत्तिरित्यादिप्रत्यय
स्यानुभवादिति भावः। संयोगाभावे वृक्षावृत्तित्वप्रत्यय इव द्रव्यवृत्तिताभावे सत्तावृत्तित्वप्रत्ययेपि विवादसं

गदा० पं० भवाद्यत्र सामानाधिकरण्याभावस्य न प्रत्यक्षसंभवस्तत्र तत्सत्वे मानाभावेन तदनधिकरणत्वं निश्चेतुं दुष्करमिति। अ सार्व०
२८ तिव्याप्तिरित्याह। अतींद्रियसाध्यकइति। इदं गुरुः द्रव्यत्वात् पृथिवी आकाशाभावादिसादावित्यर्थः। तत्रेति। गुरुत्वा
दिसाध्यकस्थले साध्यसामानाधिकरण्याभावस्यातींद्रियप्रतियोगिकत्वेनातींद्रियतया अतींद्रियहेतुकस्थलेव
धर्मिण एव तथात्वेन हेतौ साध्यसामानाधिकरण्याभावस्य प्रत्यक्षासंभवेन तत्र तदसिद्धेरित्यर्थः। अथवा स्तंभा
दौ पिशाचत्वाभावस्येव स्तंभत्वादौ पिशाचत्वसामानाधिकरण्याभावस्य महति वाय्वादौ रूपाभावस्येव महावायु
त्वादौ रूपसामानाधिकरण्याभावस्यापि प्रत्यक्षत्वादुभयत्रातींद्रियत्वोपादानं। तदभाववद्वृत्तित्वेन। गुरुत्वाभा
ववद्वृत्तित्वेन। तत्र। द्रव्यत्वादौ। ततः। गुरुत्वादिमद्वृत्तित्वाभाववत्वं। अनुमेयमिति। तद्विरुद्धदृष्टांतेनेत्यादिः। तदू
दिति। गुरुत्वादिमदित्यर्थः। उपाधिनादिति। तद्विरुद्धदृष्टांते तद्वृत्तिभिन्नत्वस्य साध्यव्यापकतायाः पक्षीभूतत्व
कृतहेतौ च भेदस्य व्याप्यवृत्तित्वेन साधनाव्यापकतायाः स्फुटत्वात् पक्षे साध्यसंदेहेन पक्षावृत्तितादृशोपाधौ
साध्यव्यापकत्वनिश्चयासंभवेपि संदिग्धोपाधित्वस्य दुर्वारत्वात् अनुकूलतर्कविरहे संदिग्धोपाधेरपि दूषक

त्वादितिभावः। नन्वेवमतींद्रियसंयोगादेरपि अव्याप्यवृत्तित्वं न स्यात् तद्वृत्तितदभावस्य प्रत्यक्षासंभवेनासिद्धेः अनुमा
नस्याप्रयोजकत्वात्। एवं सामानाधिकरण्यस्याव्याप्यवृत्तितामाश्रित्य समणिकृतेव सिद्धांतलक्षणे हेतुसमानाधिकरण्या
भावप्रतियोगिसामानाधिकरण्याभावस्य विशेषणताकल्पे कर्मण्येव संयोगाभावः प्रतियोग्यसमानाधिकरण इति
ग्रंथेनाव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिव्याप्तिरुद्धृता तथा च तन्मते युक्तिर्भवतु वा मा वा उभयथापि तदाश्रित्य पू
र्वपक्षलक्षणं व्याचक्षाणेनापराध्यतीत्याशंक्य दूषणांतरमाह। इदमिदानीमिति। कालिकविशेषणतात्मकविल
क्षणसंबंधेनेत्यर्थः। अभावादेरिहेति प्रत्ययनियामको यो दैशिकविशेषणताविशेषः तत्र तादृशसंबंधवैलक्षण्य
स्य प्रामाणिकतालाभाय विलक्षणप्रतीतिनियामकत्वाभिधानं नन्विदानीमिति प्रतीतौ संबंधवैलक्षण्याभावेपि
कालत्वेनाधिकरणावगाहनादिहेति प्रत्ययात्तस्य वैलक्षण्यमुपपद्यते इति किं संबंधवैलक्षण्येनेति वाच्यं संबंध
विशेषानुयोगित्वादत्यंस्य कालत्वस्य दुर्वचत्वात् इदानीं कालत्वाभाव इत्यादिप्रतीत्या कालकालत्वाभाववृत्तेः प्रामा
णिकत्वेपि कालकालत्वं नास्तीति प्रतीत्यनुदयान्नास्तीत्याकारकप्रतीतौ कालिकसंबंधव्यावृत्तरूपावच्छिन्नायाए

गदा॰ पं॰ वविशेषणतायांनियामकत्वस्यावश्यकत्वात्। दैशिककालिकसंबंधसाधारणसंबंधतावच्छेदकस्याप्रामाणिकतयाका सार्व॰
लिकसंबंधेसंबंधतावच्छेदकीभूतस्यवैलक्षण्यस्यसिद्धेर्निष्प्रत्यूहत्वाच्चसद्धेतावितिकालत्वादिसाध्यकधूमादिहेता
२९ वित्यर्थः। कालइतिकालावच्छेदेनेत्यर्थः। अप्रसिद्धेरितिवृत्तिमतःकालावच्छेदेनकालत्वादिसामानाधिकरण्यवत्त्वाद
वृत्तिनिष्ठतदभावस्यचकालानवच्छिन्नत्वात् अवच्छेद्याधिकरणसंबंधिनोनवच्छेदकत्वात्। अथहेत्वधिकरणम
हाकालावच्छेदेनमहाकालएवकालवृत्तित्वाभावःप्रसिध्यतिमहाकालस्यगगनादिवद्वृत्तितयातत्रकालवृत्ति
रम त्वासत्त्वात् स्वस्यतादात्म्यसंबंधेनसंबंधितयास्वनिष्ठाभावावच्छेदकत्वसंभवात्। नचतादात्म्यसंबंधोनावच्छेद
कतानियामकः नृपपर्वतेनवह्निमत्संयुक्तत्वमितिप्रतीतिवत्स्वस्मिन्रूपेनवह्निमत्संयुक्तत्वमित्यादिप्रतीतेः।
सविवादत्वादितिवाच्यंतथासतितादात्म्यसंबंधेनव्यभिचारिणितदतिरिक्तसंबंधेनासंबंधहेतौतेनसंबंधेनहे स्वा
तुमत्त्वावच्छेदेनसाध्यासामानाधिकरण्यवत्त्वविरहादतिव्याप्तेःस्फुटतयातद्दोषापेक्षायाअनुचितत्वापातात्
अत्रकेचित्कालिकसंबंधेनगगनादेरपिवृत्तिमत्त्वमताभिप्रायकोयंग्रंथःतथाचकालावच्छेदेनमहाकालेपि

स्त

कालिकसंबंधेनसाध्यवद्वृत्तित्वसत्वात्तद्विरहिणोप्रसिद्धिर्नविरुध्यतइतिवदंतिवस्तुतस्तुस्वस्मिन्सामानाधिकरण्य
तदभावयोर्वृत्तावच्छेदकत्वेस्वाधिकरणत्वमेवनियामकंनतुसंबंधितामात्रंस्वाधिकरणावच्छेदेनैवस्वस्मिंस्तत्सत्ती
तेरनुभवसिद्धत्वात् अतएवसंबंधांतरेणसंबंधइत्येकपक्षस्यसंबंधांतरेणवर्तमानइत्यभिहितंनचैवंतादात्म्यादिवृ
त्तिनियामकसंबंधेनव्यभिचारिण्यतिव्याप्त्यकथनात्सनतादुर्वारैवेतिवाच्यंतादृशसंबंधेनसाध्यवद्वृत्तित्वस्यहेत्व
धिकरणत्वस्यचाप्रसिद्ध्यातिव्याप्त्यसंभवात्नचवह्निमान्तादात्म्येनघटवतइत्यादौतेनसंबंधेनसाध्यतौलक्षण
संगमनायवृत्तेरधिकरणतायाश्चस्थलेसंबंधप्रतियोगित्वानुयोगित्वयोरेवनिवेशनीयत्वात्।अतिव्याप्तेरावश्य
कत्वेतिवाच्यंप्राचांमतेतेनसंबंधेनव्याप्त्यनभ्युपगमसंभवेनरसादेरपिनिवेशसंभवइत्यभिप्रायेणैवातिव्याप्त्य
नुद्भावनात्।एतेनहेत्वधिकरणखंडकालावच्छेदेनकालिकसंबंधेनतदवृत्तौतद्विषयकज्ञानएवसाध्यासामाना
धिकरण्यप्रसिद्धिःसंभवतिनचैवमपिकालत्वात्सर्वस्मादिसादौखंडकालस्यहेत्वनधिकरणतयाहेत्वधिकरण
वच्छिन्नसाध्यासामानाधिकरण्याप्रसिद्धिर्दुर्वारैवेतिवाच्यंहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणपर्यंतानिवेशनेवै

शिष्टव्यासज्यवृत्तिधर्मावच्छिन्नस्य यत्र हेतुत्वमभिमतं तत्र तादृशधर्मस्यैव तन्मते स्वावच्छिन्ननिरूपिताधिकरणत्वरूपप
रंपरासंबंधेन हेतुत्वस्यानुमततया उक्तस्थले सर्वत्वस्यैव तादृशसंबंधेन हेतुतया तादृशसंबंधेनावृत्तेः कालिकसं
बंधेन कालवृत्तेर्गगनत्वादावेव तादृशसंबंधेन साध्यवद्वृत्तित्वाभावस्य हेत्वधिकरणकालावच्छेदेन प्रसिद्धेरिति नि
रस्तं तादृशकाले उक्ततज्ज्ञानस्य विषयतासंबंधसत्वेपि तादृशसंबंधस्य वृत्तिनियामकत्वानभ्युपगमेन तज्ज्ञान
स्य तत्कालीनताविरहेण चैतस्य तत्तज्ज्ञानानधिकरणत्वात् तज्ज्ञानेऽभाववृत्तेस्तत्कालस्यानवच्छेदकत्वात्। महाकाला
नुयोगिकविशेषणता विशेषणघटादिहेतुकस्थलाभिप्रायकोयं ग्रंथः तादृशसंबंधेन हेतुमत्तायाः खंडकालेऽभा
वान्नोक्तदिशा प्रसिद्धिरित्यपि केचित् अन्यस्वनिष्ठहेतुतावच्छेदकसंबंधावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदक
तादृशसंबंधावच्छिन्नस्वाधिकरणतावत्सामान्यकत्वं विवक्षणीयमिति नोक्ताव्याप्त्यवकाशः स्वावयवपरमाण्वव
च्छेदेन घटादेर्वर्तमानकालत्वादिसामानाधिकरण्याभावे तदधिकरणकालसामान्यस्यानवच्छेदकतया तल्ल
क्षणसमन्वयसंभवात्। केवलान्वयिसाध्यकेमेयत्वादौ सर्वाधिकरणावच्छेदेनैव हेतुतावच्छेदकसंबंधावच्छिन्नसा

ध्यवद्वृत्तित्वसत्वात् स्वनिष्ठतदभावाप्रसिध्याव्याप्तिर्नक्षतिमावहति। मूलकृतैव तत्राव्याप्तेर्वक्ष्यमाणत्वात् यद्विचैव
मात्मभिन्नंज्ञानवदन्यत्वादित्यादौ हेतौ सामान्यस्य कालवृत्त्यवच्छेदेन दैशिकविशेषणतया साध्यवद्वृत्तित्वसत्वात् आ
त्मनश्चकेनापि संबंधेन हेतुमत्वाभावात्। तदवच्छेदेन हेतौ साध्यसामानाधिकरण्याभावकूटासंभवात् हेतुनिष्ठता
दृशाभावाप्रसिध्याव्याप्तिरिति विभाव्यते तदा हेतुतावच्छेदकसंबंधेन यत्त्वाधिकरणं तदवच्छेदेन स्वस्मिन्नुवर्तते यो
भावस्तत्प्रतियोगितानवच्छेदकतादृशसंबंधावच्छिन्नसाध्यवद्वृत्तित्वत्वकतव्यं व्याप्तिरियेव विवक्षणीयं कालत्ववा
न्घटादित्यादौ कालावच्छेदेन घटादौ वर्तमानः कालसमवेतत्वाद्यभाव एव प्रसिद्धः तत्प्रतियोगितानवच्छेदकं चैका
लिकसंबंधावच्छिन्नकालवृत्तित्वत्वादिकमिति लक्षणसमन्वयः हेतुतावच्छेदकसंबंधेन यद्वृत्तिमत्तन्निष्ठतत्संबं
धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकत्वसंबंधावच्छिन्नतद्वृत्तत्वप्रकृतहेतूभयाधिकरणतावत्सामान्यकत्वं वा
वक्तव्यं आत्मभिन्नंज्ञानवदन्यत्वादित्यादावात्माद्यवच्छेदेन घटत्वाभावादिनिष्ठस्यात्मान्यवृत्तित्वाभावस्यानवच्छे
दकं घटत्वाभाववज्ञानवदन्यत्वोभयाधिकरणसामान्यमिति लक्षणसमन्वयः उभयाधिकरणत्वनिवेशाद्धिमा

गदा० पं०

३१

न्धूमादिसाध्ये धूमादिसंयोगिनः कपालादेर्घटादिनिष्ठवन्हिमत्संयुक्तत्वाभावावच्छेदकत्वेपिनक्षतिः कपालादिसंयोगि
न घटानधिकरणतयोक्तोभयाधिकरणतावत्सामान्यान्तर्गतत्वात्। अथवा हेतुतावच्छेदकसंबंधेन यत्त्वाधिकरणं
तदवच्छिन्नत्ववृत्तिकान्यहेतुतावच्छेदकसंबंधावच्छिन्नसाध्यवद्वृत्तित्वाभावविवक्षणान्न कश्चिद्दोषः सर्वत्र सद्धेतौ
वंततोऽवृत्तौ प्रसिद्धसाध्यसामानाधिकरण्याभाव एव तादृशस्त्वे वृत्तिकामतसत्त्वेन लक्षणसमन्वयात्। वन्ह्यादि
निष्ठधूमादिसामानाधिकरण्याभावेऽयोगोलकादेरिव तद्वृत्तित्वस्याप्यवच्छेदकत्वात्स्वनिष्ठहेतुतावच्छेदकसं
बंधावच्छिन्नवृत्तित्वावच्छिन्नहेतुतावच्छेदकसंबंधावच्छिन्नसाध्यसामानाधिकरण्याभावकत्वं वा विवक्षणीयमि
त्यादयः परिष्कारस्य पंथानो द्रष्टव्याः॥ ० ॥श्रीः॥ अथ समवायित्वेत्यादिमूलं व्यधिकरणधर्मावच्छिन्नप्रतियो
गिताकाभावाभ्युपगम एव संगच्छते तादृशाभावाभ्युपगमे सर्वत्र तदभाववति हेतोर्वृत्तेरसंभवः। साध्याभाव
वद्वृत्तित्वस्य तादृशाभावमादाय लक्षणसंगमने सर्वत्रव्यभिचारिण्यतिव्याप्तिरिति लक्षणपरिष्कारासंभवे
न सौंदडमतमवलंब्य लक्षणकर्तुरिदशशंकानसंगच्छत इति चेत् अत्रोपाध्यायानुयायिनः केवलान्वयिनि

साध्याभावाप्रसिद्धिनिबंधनस्य दोषस्योद्भावितत्वात्साध्याभावस्य कथंचित्प्रसिद्धावेव लक्षणस्य निर्दोषतेत्यभिमा
नेनेयं माशंका तादृशाभिमानमेव निराकरिष्यत्यग्रे तर्हीति ग्रंथे न व्यधिकरणधर्मावच्छिन्नाभावोपगमे यथा व्य
भिचारलक्षणे साध्यतावच्छेदकावच्छिन्नसाध्याभावो निवेश्यते तथा व्याप्तिलक्षणेपि तादृशसाध्याभाव एव निवे
श्योन्यथासंभवस्यातिव्याप्तेर्वा प्रसक्तेर्व्याप्तेरव्यभिचाररूपतानुपपत्तेश्चेति पुनरप्रसिद्धिनिबंधनाव्याप्तिः केवला
न्वयिस्थल एवेति तदर्थः। न चैवमपि तत्तद्वह्नित्वावच्छिन्नाभावव्यावर्तकसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्व
रूपेण साध्याभावस्य निवेशनीयतया वाच्यत्वावच्छिन्नसाध्यकस्थले समवायित्वावच्छिन्नतदभावस्य तादृशत्वा
त्तादृशाभावप्रसिद्धिरनुपयोगिनीति कथमियमाशंका साध्यप्रतियोगिकाभावनिवेशाभिमानस्याप्याशंकाबी मात्र
जत्वे केवलान्वयिसाध्यकस्थले व्याप्यवृत्तिरूपावच्छिन्नप्रतियोगिताकस्य विशिष्टाभावरूपस्य वा तादृशाभाव
स्याप्रसिद्धिसंभवेन सैद्धांतमतावलंबनस्य निर्बीजत्वापातादिति वाच्यं। महानसीयवह्नित्वाद्यवच्छिन्नाभाववार
णाय साध्यतावच्छेदकापर्याप्तिस्वसमानाधिकरणधर्मानिष्ठावच्छेदकताकप्रतियोगिताभिन्नप्रतियोगिताकाभा

गदा०पं० व एव निवेश्य इत्यभिमानेनाशंकासंगच्छते प्रमेयत्वादिना प्रमेयमात्रं यत्र साध्यतावच्छेदकं तत्र प्रमेयत्वादिविशिष्टप्रमेया अव०
पर्याप्तं तद्विशेषितघटत्वादिनिष्ठमेवावच्छेदकत्वं प्रसिद्धं स्वसमानाधिकरणवृत्तितादृशावच्छेदकतानिरूपकप्रतियो
३२ गिताभिन्नं व्यधिकरणधर्मावच्छिन्नप्रतियोगितामात्रमेव यत्र यादृशं साध्यतावच्छेदकं विशिष्टमविशिष्टं वा तत्र त
दनवच्छिन्नत्वसमानाधिकरणधर्मावच्छिन्नत्वोभयाभाववत्प्रतियोगितानिवेशाभिप्रायकोऽयं ग्रंथ इत्यप्याहुः नैव
वं प्रमेयत्वावच्छिन्नसाध्यकस्थलेऽपि व्यधिकरणधर्मावच्छिन्नाभावमात्रस्यैव लक्षणघटकतासंभवाद्दीधितिकृतां तत्र
सामान्या गगनत्वघटत्वपटत्वोभयाद्यवच्छिन्नप्रमेयाभावपर्यंतानुसरणप्रयासो व्यर्थ इति वाच्यं महानसीयवह्नित्वाद्यव
च्छिन्नाभाववारणाय साध्यतावच्छेदकसमनियतप्रतियोगिताकः साध्यतावच्छेदकापर्याप्तसाध्यनिष्ठधर्मद्वयावच्छे
दकताकान्यप्रतियोगिताकाभावो निवेश्यस्तदभिप्रायेणैवैतेस्तथाविधाभावानुसरणात् नच घटत्वपटत्वोभ
यावच्छिन्नाभावप्रतियोगितावच्छेदकतासाध्यवृत्तिधर्मनिष्ठ वघटत्वपटत्वयोः प्रसंकं साध्यनिष्ठत्वादिति कथम
सौ लक्षणघटक इति वाच्यं। साध्यवृत्तिधर्मनिष्ठत्वेनेन यत्पर्याप्त्यधिकरणधर्मविशिष्टाधिकरणं साध्यवत्तत्स्य

तादृशावृत्तित्वमूलाव्याप्त्यपरिनिस्तारादतः कल्प्यांतरमनुसर्त्तव्यमिति

विवक्षिततया घटत्वपटत्वोभयपर्याप्तावच्छेदकताया अन्यत्वप्रतियोगिकोटावनंतर्भावात्। वस्तुतो वृत्तिमद्
त्तयो यावंतः साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटाधिकरणवृत्तित्वाभावास्तद्वत्त्वमेव साध्याभा
ववद्वृत्तित्वमित्यस्यार्थ इत्यभिप्रायकतया ऽथेत्यादिग्रंथः सार्वभौमैर्व्याख्यातः दीधितिकृतामपि तादृशग्रंथ
स्यैतदभिप्रायकत्वमेवाभिमतं कूटघटितलक्षणस्य स्वयमेवाग्रे दूषणीयत्वेप्यापाततः संभवदुक्तिकतयैव तस्या
शंकितुरभिप्रायविषयत्वोचित्यात् व्यधिकरणधर्मावच्छिन्नाभाववादिमते निर्दोषस्यापि लक्षणस्य संभवेन तदु
पेक्ष्य सदोषं कूटघटितलक्षणमवलंब्य प्रतियोग्यवृत्तित्वे साध्यवतारणमनुचितमित्यभिप्रेत्यैवाग्रे तल्लक्षणमाक्षे
प्स्यामिति न संदर्भविरोधः। यत्समानाधिकरणइत्यादिलक्षणाभिप्रायकता चात्र न युज्यते तादृशव्याप्तेः साध्याभा
ववद्वृत्तित्वरूपताप्रसक्तेर्मूलोक्तलक्षणपरिष्कारतासंभवात् अव्यभिचारशरीरे च साध्यतावच्छेदकावच्छिन्नसाध्या
भावनिवेशावश्यकतां प्रदर्श्य केवलान्वयिसाध्यकसाधारणसाध्याभाववदवृत्तित्वरूपव्याप्तेरव्यभिचाररूपतान
संभवतीत्यभिधानेनाव्यभिचारपदार्थरूपसाध्याभाववदवृत्तित्वाभाव्यस्य व्याप्तित्वे निराकृते च साध्याभाववदवृत्ति

गदा० पं० त्वपदार्थस्यव्यापित्वानभ्युपगमेपिनक्षतिरितिसाशयेनयद्विसादिनिर्देशलक्षणमवलंब्यैवप्रतियोग्यवृत्तीत्यादेःस्वय अव०
३३ मवतारणीयत्वात्।ननुसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकूटवतिवृत्तित्वस्यापिव्यभिचारपदार्थत्वसं
भवादुक्तव्याप्तिरव्यभिचाररूपत्वमक्षतमेवेतिवाच्यं तस्यव्यभिचारपदार्थत्वेनचैवंघटएवेत्यादिदर्शितायाज्ञेयत्वा
दिहेतौवाच्यत्वव्यभिचरितापत्तेर्दुर्वारत्वाद्वाच्यत्वादेःसमानाधिकरणधर्मावच्छिन्नाभावाप्रसिद्धेःव्यधिकरणध
र्मावच्छिन्नाभावकूटवतिचहेतोर्वृत्तेरितिसर्वमनाकुलं एवंचकूटघटितलक्षणाभिप्रायेणैवप्रमेयसाध्यकस्थ
लेउक्ताभावानुधावनंग्रंथकृतांसफलंघटत्वाद्यवच्छिन्नपटाभावस्यसाध्यतावच्छेदकसमनियतप्रतियोगिता
कत्वविरहादितिध्येयं।ननुवाच्यत्वंपदशक्तिःसाचतत्तत्पदबोध्यत्वप्रकारिकाभगवदिच्छैवनतुपदार्थांतरम
पसिद्धांतत्वात्।तथाचसमवायित्वंसमवायप्रतियोगित्वरूपंतदनुयोगित्वरूपंवाभवतुउभयथैववाच्यत्ववृत्ती
तितेनरूपेणतदभावस्यकथंव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वंननुभगवदिच्छायावाच्यत्वपदार्थत्वेप
टादेर्घटादिपदावाच्यत्वानुपपत्तिः।घटादाविवपटादावपिघटादिपदबोध्यत्वप्रकारिकायाभगवदिच्छायावि

१ विशेष्यतासंबंधेनतद्धर्मप्रकारकत्वविशिष्टत्वोपगमात्पटादेर्घटादिपदबोध्यतयाभगवदिच्छया अनवगाहनात्तत्र १

षयतासंबंधेनसत्वात्तदिच्छायाएकत्वादितिवाच्यंयद्धर्मेविशेष्यस्यप्रकारतातत्स्यैवधर्मिणोविशेष्यतासंबंधेनत
द्बोध्यत्वप्रकारकत्वविशिष्टभगवदिच्छाविरहेणतद्वाच्यत्वोपपत्तेःनन्वेवंविशिष्टेच्छायावाच्यत्वरूपत्वेविशेष
णांशेसमवायिताभावात्तेनरूपेणविशिष्टाभावस्यव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमव्याहतमेवेति
न वाच्यंयतोविशिष्टाभावप्रतियोगितोविशेषणांतर्भावेणपर्याप्ता अपितुविशेष्यांशमात्रावच्छिन्नेतपुनरियंविशे
षणेनेतिप्रतियोगितायाअव्यासज्यवृत्तित्वात्तथाचविशेष्यवृत्तेसमवायित्वस्यकथंप्रतिप्रतियोगिताव्यधि
करणत्वमितिनचप्रतियोगितायाव्यासज्यवृत्तित्वानुपगमेसर्वत्रघटत्वेनघटपटोभयंनास्तीतिप्रतीतिःकथ
मुपपद्यतांघटादिमतिप्रतियोगितावच्छेदकविशिष्टप्रतियोगिसत्वेनतद्विषयाभावासंभवादितिअभावविशे
षीयप्रतियोगित्वमवश्यमेवव्यासज्यवृत्त्येपेयंतथासतिचतत्रप्रतियोगितापर्याप्त्यधिकरणस्योभयत्वावच्छिन्न
स्यप्रतियोगितावच्छेदकघटत्वादिविशिष्टत्वासंभवाद्यद्धर्मावच्छिन्नप्रतियोगितायाःपर्याप्तिःप्रतियोगितावं
च्छेदकविशिष्टतदवच्छिन्नस्यैवचाभावविरोधितयातादृशाभावस्यसार्वत्रिकत्वादितिवाच्यं।प्रतियोगिताया

५ ( तथाचाभावप्रतियोगितावच्छेदकतायाद्वृत्तौ तादृशानिरूपकतावच्छेदकस्य प्रतियोग्यधिकरणतया समभावस्याविरोध इति घटत्वेन घटपटोभयवतीति प्रमाया अतिप्रसंगात्तादृशाभावविरोध्यधिकरणता अप्रसिद्धेति तादृशाभावस्य
( केवलान्वयित्वं घटपटौ न स्त इति प्रतीतिविषयाभावस्य तु घटपटोभयवदिति प्रतीत्याविरोधः अधिकरणताप्रसिद्धेर्न केवलान्वयित्वं ) विशेषणावृत्तिधर्मावच्छिन्नप्रतियोगिताकस्य विशिष्टाभावस्य व्यधिकरणधर्मावच्छि ६



अव्यासज्यवृत्तित्वेपि तन्नैकधर्मावच्छिन्नापर्याप्तिनिरूपविरोधशालिनो घटत्व घटपटोभयत्वयोः प्रतियोगितावच्छेदकत्व
स्यव्यासज्यवृत्तित्वोपगमात्। तादृशाभावस्य विरुद्धघटत्वपटत्वाद्युभयावच्छिन्नाभावत्वे केवलान्वयित्वोपपत्तेः यद्य
पि घटपटौ न स्त इत्यादिप्रतीतिविषयसमानाधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वमपि घटत्वाद्यन्त
र्भावेण पर्याप्तं तथापि तत्र द्वित्वधर्मितावच्छेदकतापन्नस्यैव घटत्वादेरवच्छेदकता प्रतीयते अत्र च स्वातंत्र्येणा
पीति भेदः आस्तां वोभयाभावप्रतियोगिताया असंतराभावाव्यासज्यवृत्तित्वं तथापि विशिष्टाभावप्रतियोगि
तायास्तथात्वमप्रामाणिकमेव दंडिपुरुषादिमति पुरुषत्वेन दंडविशिष्टो नास्तीत्यादिप्रतीतेरसिद्धेरित्यत आह। दी
धितौ वाच्यत्वं यथेति तथावस्य इति अयमाशयः वाच्यत्वं शक्तिविषयत्वं न तु शक्तिः धातुनेव शक्तिप्रतिपादनात्।
प्रत्ययस्य निरर्थकतापत्तेः विषयत्वं च पदार्थांतरमिति नैय्यायिकैकदेशिसिद्धांतः तस्य च समवायो न संबंधः
अपि तु स्वरूपमेवेति समवायितया वाच्यत्वपदार्थाभावो व्यधिकरणधर्मावच्छिन्नाभाव एवेति एकदेशिमतानु
यायितया मणिकारलिखनसंगतिरिति घटादिसमवायितयेति तथाच वाच्यत्वपदस्य भगवदिच्छापरत्वेपि ना

न्नाभावतया केवलान्वयित्वे दंडपादिमति दंडित्वेन दंडो नास्तीति प्रतीत्यापत्तेः विशिष्टाभावप्रतियोगिताया विशिष्टपर्याप्तत्वे विशेषणावच्छिन्नप्रतियोगिताकस्य तद्भावस्य तद्विशिष्टाधिकरणताविरोधिताया
आवश्यकत्वात्पदे वाच्यत्वप्रकारकत्वविशिष्टाऽस्वेच्छाया असमवायित्वविशिष्टाया अपि सर्वत्र विषयसत्ताया स्वेन तद्रूपावच्छिन्नतादृशविशिष्टाभावाप्रसिद्धेरेवेत्यत

त्व
संगतिरितिभावः यथाश्रुतपरतयोपपत्तेः समवायिपदस्य विशेषपरतयाव्याख्यानमनुचितमित्याहुरित्यने
नास्वरसः सूचितः। ननु वाच्यत्वादिसाध्यकस्थले समवायित्वरूपव्यधिकरणधर्मावच्छिन्नसाध्याभावप्रसिद्धेः संभ
वेपि प्रमेयत्वादिना प्रमेयसाध्यकस्थले साध्याभावाप्रसिद्धिर्दुर्वारैव प्रमेयसामान्यावृत्तिधर्मस्याप्रसिद्धत्वेन
व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यापि तस्यासंभवादित्यत आह प्रमेयसाध्यके त्वेतिभावत्वेनेति अभा
वानां भावानामित्युभयत्रैवाभावद्वयमिमस्य संबंधः अभावत्वभावत्वाभ्यां भावाभावयोरभावो समनिय
ततयाऽभिन्नावितितत्प्रतियोगितात्वेन प्रमेयत्वादिसमनैयत्यमियतादृशाभावोपि कूटघटनयापरिष्करणी
यसाध्याभाववदवृत्तित्वरूपप्रथमलक्षणघटकोऽभविष्यतीत्यभिप्रायः नञ्पदभावीयप्रतियोगितात्वेन सा
ध्यतावच्छेदकसमनैयत्यमिति विवक्षणे वाच्यत्वादिसाध्यके वह्न्यादिसाध्यके वा तादृशाभावाप्रसिद्धिः निखिल
व्यधिकरणधर्मावच्छिन्नाभावानां समनियतत्वेनाभिन्नतया घटादेरपि तथाविधवाच्यत्वाभावप्रतियोगिता
तु किंचिद्विशिष्टस्वाभावादेरपि वह्न्याद्यभावप्रतियोगित्वादिति तत्प्रतियोगितात्वेन समनैयत्यं विवक्षणीय

गदा०पं० मितिकथमुक्ताभावस्य लक्षणघटकतेति वाच्यं। समनैयत्यसशरीरे व्यापकतायास्तदभावप्रतियोगितात्वावच्छि अव०
३५ न्नायाव्याप्यतायाश्च विशेषणरूपावच्छिन्नाया निवेशनेनानुपपत्त्यभावात् (ननु साध्यनिष्ठान्योन्याभावप्रतियो
गितात्वावच्छिन्नाया व्याप्यतायाश्च विशेषणरूपावच्छिन्नाया निवेशनेनानुपपत्त्यभावात्) ननु साध्यनिष्ठान्योन्याभा
वप्रतियोगितानवच्छेदकत्वरूपव्यापकताचेत्समनैयत्यसशरीरे निवेश्यते तदा व्यधिकरणधर्मावच्छिन्नयोऽभावा
भावद्वृत्तिप्रतियोगितयोर्द्वयोरेव प्रसक्तं प्रमेयनिष्ठान्योन्याभावप्रतियोगितावच्छेदकतयानोक्ताभावस्य सा
ध्यतावच्छेदकसमनियतप्रतियोगिताकत्वमित्यताभावांतरमाह। वन्हित्वेनेति। प्रमेयमात्रस्याभावइत्यत्रेत
नेनान्वयः। वन्हित्वेन प्रमेयं नास्तीति प्रतीत्या प्रमेयसामान्य एव वन्हित्वावच्छिन्नप्रतियोगित्वावगाहनात्। प्रमेय
त्वव्यापिकैव तादृशाभावीयवन्हित्वावच्छिन्नप्रतियोगितेति भावः। यदि च तत्र वन्हिर्नास्तीति प्रतीतिसिद्धवन्हि
मात्रनिष्ठप्रतियोगितैव प्रमेयत्वसामानाधिकरण्येन भासत इत्युपेयते प्रमेयसामान्यस्यैव तत्प्रतियोगि
तयाभानोपगमे तु वन्हिर्नास्तीत्यादावपि तादृशप्रतीतिसिद्धनिखिलप्रमेयनिष्ठप्रतियोगितायावन्हित्वा

दिविशेषितप्रतियोगिवृत्तित्वेन भानोपगमसंभवात् समानाधिकरणधर्मावच्छिन्नवन्हित्वादिसमनियतप्रति
योगिताप्रसिद्ध्या वन्हिभिन्नत्वादिना वन्ह्याद्यभावीयवन्हिमात्रवृत्तिप्रतियोगितामादाय वन्हिमान् प्रमेयत्वादि
साद्यावतिव्याप्त्यापत्तेरित्यपास्तं तदा तादृशाभावस्य नोक्तरूपतयाशंक्याभावांतरमनुसरति अवृत्तिमात्रेति ग
गनं नास्तीत्यत्र गगनत्वसामानाधिकरण्येन यागगनत्वावच्छिन्नप्रतियोगिता प्रतीयते सैव गगनत्वेन गगनभि
न्नं नास्तीत्यादौ गगनभिन्नत्वादिसामानाधिकरण्येन प्रतीयते अवच्छेदकैक्ये सति बाधकं प्रतियोगिताया अ
वैक्यस्वीकारात्तु गगनभिन्नवृत्तिप्रतियोगितायागगनवृत्तित्वेपि गगनत्वरूपप्रतियोगितावच्छेदकविशिष्ट
प्रतियोगिनो वृत्तित्वेन गगनतया गगनभिन्नाभावस्य केवलान्वयित्वोपपत्तेः वन्हित्वाद्यवच्छिन्नघटादिनिष्ठप्र
तियोगिताया अवन्हिनिष्ठतादृशप्रतियोगिताभ्युपगमे वन्ह्यादिमति वन्हित्वादिना घटाद्यभावसत्वानुपपत्त्याउ
क्तरीत्या तत्रैकप्रतियोगिताप्यसंभवः एवं च गगनत्वावच्छिन्नैव प्रमेयत्वसमनियतप्रतियोगिताप्रसिद्ध्यती
तिभावः उक्तविशेषणलाभायैवावृत्तिमात्रवृत्तित्वकीर्तनं नन्वेवमपि यत्र विषयितासंबंधेन प्रमेयसामान्यंसा

२ साध्यतावच्छेदकसंबंधावच्छिन्न २

गदा० पं० न ध्यंईश्वरज्ञानादिकंहेतुस्तत्रसत्तावानज्ञातेरित्यादौसाध्याभाववद्वृत्तिहेतुतावच्छेदकसंबंधेनवृत्त्यप्रसिध्याव्या अव०
प्तेर्वारणायोपादेयसाधनसामानाधिकरण्यविशेषणीभूतसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभावाप्र
३६ सिद्धिःगगनादिरपिविषयितासंबंधेनेश्वरज्ञानादिसंबंधत्वात्तादृशसंबंधेनगगनवत्वादिनाप्रमेयसामान्याभा
वस्यसाधनसामानाधिकरण्यासंभवादित्यतोभावांतरमाह।विरुद्धेतियेनसंबंधेनघटत्वपटत्वयोर्विरोधस्तत्सं
बंधावच्छिन्नतदुभयनिष्ठप्रतियोगितावच्छेदकताकप्रमेयसामान्याभावइत्यर्थः।प्रतियोगितावच्छेदकतावच्छे
दकोभयत्वविशिष्टघटत्वपटत्वाद्यवच्छिन्नप्रतियोगिनोप्रसिध्याविरोधिविरहेणोक्ताभावस्यकेवलान्वयित्वस्य
वधेयंइदंतुपलक्षणंव्यधिकरणधर्मावच्छिन्नाभावादीनांप्रतियोगितावच्छेदकतावच्छेदकरूपेणवतादृश
संबंधेनाप्यवच्छेदकस्यवृत्तिमत्तायाअवच्छेदकतायामतंत्रत्वात्समवायादिसंबंधेनगगनाद्यवच्छिन्नप्रमेय
सामान्याभावस्यापिसंलभ्यं।बाध्यंअसंताभावस्येवान्योन्याभावस्यापिव्यधिकरणधर्मावच्छिन्नप्रतियोगिताक
स्योपगमात्प्रमेयसामान्यस्ययत्तादात्म्येनसाध्यतातत्रघटत्वपटत्वाभ्यांसमवायेनगगनादिनावाप्रमेयसा

मान्यभेदोलक्षणघटकःप्रतियोगितावच्छेदकावृत्तिसमवायित्वाद्यवच्छिन्नप्रमेयत्वादिनाप्रमेयसामान्यभेदो
वातथ्यसर्वधेयं॥ ७॥ ७॥ ॥ ॥६०॥ ॥

गदा॰पं॰

३७

गादाधर्यांपंचलक्षणीसमाप्ता॥श्री रस्तु॥